तपसायोगेनतद्धृत्वेनेसर्पः अंतर्भूतेनअंतरेण नतुसमीलुक्ष्मादपप अादिवाह्यद्रव्यसाध्येनभास्वताचैतान्यप्रकाशवत्तादिविहार्दाकाशेसूर्यादि
कंतपसायोगेनभासतेयावान्वाअयमाकाशस्तावानेषोंतर्हृदयआकाशउभेअस्मिन्द्यावापृथिवीअंतरेवसमाहितेउभावग्निश्चवायुश्चसूर्याचं
द्रमसावित्यादिश्रुतेः सर्वस्मात्देतगीतत्वावगमात् अतएवयोगिनांव्यवहितादिसाक्षात्कारउपपद्यते १६ प्रकाशोविकसनेफलमित्यर्थः तप

त्रैलोक्यंतपसाव्याप्तमंतर्भूतेनभास्वता सूर्यश्चचंद्रमाश्चैवभासतस्तपसादिवि १६ प्रकाशस्तपसो
ज्ञानंलोकेसंशब्दितंतपः रजस्तमोघ्नयत्कर्मतपसस्तत्स्वलक्षणं १७ ब्रह्मचर्यमहिंसाचशारीरंतप
उच्यते वाङ्मनोनियमःसम्यङ्मानसंतपउच्यते १८ विधिज्ञेभ्योद्विजातिभ्योग्राह्यमन्नंविशिष्यते आ
हारनियमेनास्यपाप्माशाम्यतिराजसः १९ वैमनस्यंचविषयेयांतस्यकरणानिच तस्मात्तन्मात्रमाद
द्याद्यावदत्रप्रयोजनं २०

सोयोगस्यासंशब्दितंयोगिनस्तेप्रपश्यंतिभगवंतंसनातनमितिसर्वत्रख्यातंज्ञानहेतुत्वेनातस्यस्वलक्षणंअसाधारणंरूपंरजस्तमोघ्नंमव
त्यावरणायोनीशकंकर्मवैराग्यपूर्वकंवेदांतश्रवणं १७ तपोविशेषावाहब्रह्मेति १९ वैमनस्यंवैराग्यंविषयेशब्दादौकरणानिइंद्रिया
णिअस्याशिष्टान्नभुजःतावन्मात्रंआहारमात्रेननतुधनादिकंशिष्टेभ्योप्याददीत २० ॥ ॥ ॥ ॥

यः

मो० एवंविधसाधनेसंपत्त्यभावेपिमोक्षेउपायांतरमस्तीत्याह अंतेतितत्तत्स्थानां अंतकालेबलोत्कर्षात्तत्कुर्यात्तत्पदं ज्ञानंयोगयुक्तेनमनसाशनैः उपपद्यतेइत्यन्व
१३६ यः अपमार्गे आदिपर्वणिविस्तनुगृह्योह्येवाश्रमंतेलेभिरेराहुस्तत्स्थलेनामतत्पीदेवपंक्तिस्यादहमेदेनसहैवतत्क्षेमेइत्युपाख्यातेतत्राख्यायिकानो
स्वार्थेतान्यथाभावात् ततःकश्चिद्विधेयोर्थउन्नेयः सचयथोक्तसाधनानुष्ठानात्सात्त्विकामुक्तिभाजः स्युः अपसात्त्विकोपिमोक्षक्षेत्रेमरणाका
लेमुक्तिमाप्नोतीति तथाचाप्यधिकेसंवर्त्तमरुत्तीयेकाश्यांवसतः संवर्त्तस्यशवदर्शनेनशिवदर्शनसिद्धिः सूचितातेनकाश्यांमृतस्यशिवत्वे

136

अंतकालेबलोत्कर्षाद्यत्नैःकुर्यादनातुरः एवंयुक्तेनमनसाज्ञानंयदुपपद्यते २१

नतत्प्रतिमावत्तच्छरीरस्यलिंगत्वंसूच्यते तथाइहापिबलोत्कर्षादंतकालेज्ञानंकुर्यादित्युच्यते तेनसर्वेर्गुणैतेनवाक्यसंदर्भेणात्रात्रहिजंतोः प्राणेषुत्क्र अकान्तेपु २
दस्तारकंब्रह्मव्याचष्टेयेनासावमृतीभूत्वामोक्षीभवतितस्मादविमुक्तमेवनिषेवेताविमुक्तंनविमुंचेदितस्यास्तुतेरर्थः काश्यांम्रियमाणस्यरुद्रमुखवा
न्तारकोपदेशप्राप्त्यामुक्तिप्राप्तिरितिसमस्तपुराणोपबृंहितःसूचितइतिगम्यते बलोत्कर्षादितिपदेनकाश्यांवासात् अंतकालेज्ञानंकुर्यादितिई
शोपदेशात्संपादयेत् २१ राम०
१३६

एवंमोक्षसाधनांतरमुक्त्वा आपेक्षिकत्वमप्याह रजइति अयंदेही रजोवर्ज्जः वाह्येंद्रियप्रवृत्तिशून्यः समाधौ संन्यस्तः स्थूलदेहोपि देही पुरुषः देहवान्
भूत्वा शब्दवत् शब्दादिमत् तत्कार्यैः सूक्ष्मशरीरं चरेत् तत्परस्तत्कार्यैरव्याहतमतिः सः वैराग्यात् सूक्ष्मभोगेष्वपि निस्पृहः प्रकृतौ लीयते न तु प्रकृतेः परं पुरुषं
प्राप्नोति। अयंभावः स्थूलसूक्ष्मकारणशरीरैर्मुक्तो योगी सद्यो मोक्षमश्नुते। स्थूलमात्रविहीनो विदेहः स्थूलसूक्ष्माभ्यां विहीनः प्रकृतिलयः
स तौ हि सुषुप्तिस्थवत् उत्तरक्षणं प्रविविक्षतो मध्ये लयेनाभिभूतौ निर्विकल्पं पदमनुभवत इव। अतएवैयोरसंप्रज्ञातः संसारहेतुस्तथा च
त१

रजोवर्ज्योप्ययंदेही देहवांछब्दवच्चरेत कार्यैरव्याहतमतिर्वैराग्यात्प्रकृतिस्थिरः २२
आदेहादप्रमादाच्च देहांताद्विप्रमुच्यते हेतुयुक्तः सदा सर्गो भूतानां प्रलयस्तथा २३

सूत्रितं भवप्रत्ययो विदेहप्रकृतिलयानामिति २२ आदेहात् देहपातावधि अप्रमादात् अनवधानत्वाभावात् देहानां स्थूलसूक्ष्मकारणा
नामंतात् बाधात् विशेषेण सम्यगेव मुच्यते पूर्वोक्तक्रममुक्तिभाजामित्याह हेत्विति हेतुर्मूलाज्ञानं तन्नाशाद्धि देहादीनां अन्येषां च भूतानां क
मी विनाशस्ततः सर्गप्रलयौ जन्ममरणे स्त इत्यर्थः २३ ॥

मो० १३७ परम्रत्मपसर्गेष्मुद्दब्रह्मसाक्षात्कारोदयेनियतिर्धर्माधर्मैर्नानुवंध्नंतिसुद्धब्रह्मविदः तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशावितिन्यायेनपूर्वपापस्यनाश
उत्तरस्याऽसंश्लेषश्चभवतीत्यागामिजन्मकारणाभावान्मुक्तिरित्यर्थः परम्रत्मपाभावेसंसारानर्थयोगइत्याहभावेतियविपर्यंयंअनात्मसुअहंत्वादिदेहांतेषु
अन्त्यंतमस्मिनतत्समुदायेवाआत्मबुद्धिंकृत्वाआसतेतेभावानांमहदादीनांअंतप्रभवयोर्नाशोदययोरेवप्रज्ञाबुद्धिर्येषांतेतत्पाभवंति विपर्ययस्तमतीनां
मोक्षकपापिनास्तीत्यर्थः २४ धृत्वाआसनाघप्रचुत्यादेहानधारयंतोयोगिनः बुद्धासंक्षिप्तंविषयेभ्यःप्रत्याहृतंचेतोयैस्तस्थानेभ्यः अक्षादिभ

137

परम्रत्मपसर्गेतुनिपतिर्नातिवर्त्तते भावांतप्रभवप्रस्ताआसतेषेविपर्ययं २४
धृत्मादेहान्धारयंतोबुद्धिसंक्षिप्तचेतसः स्थानेभ्योक्षसमानास्वसूक्ष्मत्वात्ता
नुपासते २५

इंद्रियगोलकेभ्योध्वंसमानाःच्युताःसत्कान्नमयकोशाःसूक्ष्मत्वात्अन्नमयापेक्षयानतुवस्तुतः तानप्राणेंद्रियादीनउपासतेआत्मत्वेनचिंतयंति
यथोक्तंपुराणांतरेःदशमन्वंतराणीहतिष्ठंतीद्रियचिंतकाःभौतिकास्तुशतंपूर्णंसहस्रंत्वाभिमानिकाःबौद्धादशसहस्राणितिष्ठंतिविगतज्व
राःपूर्णंशतसहस्रंतुतिष्ठंत्यव्यक्तचिंतकाःपुरुषंनिर्गुणंप्राप्यकालसंख्यानविद्यतइति २५

एम० १३७

यस्मादेवं तस्मात् यथागमं इंद्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः
पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरितीमं वेदमनतिक्रम्य ततस्ततः परं परं स्थानं गत्वा तत्र परस्यां काष्ठायां विषये स्वयमेव बुध्याधीरात्मा बु
ध्यते जानाति परां काष्ठां देहांतं अव्यक्तादपि परं एतेनाव्यक्तात्पुरुषः पर इति श्रौतं व्यक्तपदं देहपरं न तु सांख्याभिमताव्यक्तपरमिति व्याख्यातं
आनुमानिकाधिकरणे चैतत्स्पष्टं तं देहांतं कश्चिद्देवभावितात्मा योगशोधितमतिरन्वास्तेऽमुं शास्त्राचार्योपदेशमनुप्राप्यास्ते। निराश्रयं स्वप्र
हिमप्रतिष्ठं परकाष्ठारूपत्वात् २६ युक्तमिति धारणा याधारणाविषयेणामूर्तब्रह्मणा रूपमादिना युक्तं तादात्म्यसंबंधेन सेव्यसेवकभावेन वा

यथागमं च मत्वा वै बुध्यात्तत्रैव बुध्यते देहांतं कश्चिदन्वास्ते भावितात्मा निराश्रयं २६
युक्तं धारणया सम्यक् सततं केचिदुपासते अभ्यसंति परं देवं विद्युत्संशब्दिताक्षरं २७

युक्तं निबद्धं आत्मानं कश्चिदुपास्ते सतत इति कर्मणि षष्ठी अविद्याशबलं केचिदुपासते अपरे परं शबलादुत्कृष्टं निर्गुणं ब्रह्म अभ्यसंति पुनः
पुनरनुभवविषयतामापादयंति। विद्युत्संशब्दितं सकृद्विभातो ह्येष ब्रह्मलोक इति श्रुतेर्विद्युद्वत्सकृद्विभातत्वेन विद्युत्संशब्दितं केनेषितमित्यु
पनिषत्प्रसिद्धमिदं विशेषणं अक्षरं अपरिणामि। ननु देहांतपदेनैवैतदुक्तं सत्यं तत्र ज्ञेयत्वेनोक्तं इह तु उपास्यत्वेनोच्यते कः पुनरेतावता भे
दः श्रणु आचार्यश्रवणादिप्रणाड्याऽभ्यस्तानात्मनिरसनेनात्मतत्त्वावाप्तिः स[illegible]पबाधेनैव ब्रह्मावगतिः द्वितीये तु मूलप्रमाणाभावेऽपि तत्र यथा
रोपंचरत्नानीति वदतः वाक्यं कदाचित्संवादयेत्तद्वत्तत्त्वं ब्रह्मास्मीति गुरुवाक्ये विश्वासमात्रात् स्वकृतं आत्मनो ब्रह्मभावं चिंतयन्नतमनुभवति सं·

यं संवादिभ्रमवदुपास्तिः ब्रह्मसाक्षात्कारफलेऽपि २७

मो०
१३८ अंतेतितपसाविमुक्तोपासनेनतुअंतकालेउपासंतेब्रह्मप्राप्नुवंतिअसंगताचित्स्वरूपा एतेपंचपपापोगंपरमोनिर्विशिषांगतिंक्रमेणासद्योवागच्छंति २८ सूक्ष्ममिति
विशेषणांव्यावर्त्तकमुपाधिमंतंतेषांसोपाधिकब्रह्मणां अवेक्षितहेलनयाहेयत्वेनपश्येत पश्यांक्तंकल्पतरोनिर्विशेषपरंब्रह्मसाक्षात्कर्तुमनीश्वराः येमंदास्तेः तुकं
पंतेसविशेषनिरूपणोनःस्थिरीकृतमनसेषांसगुणब्रह्मचिंतनात् तदेवाविधिवत्साक्षादपेतोपाधिकल्पनमितिदेहांतेअथवाक्तलपाधिष्ठानांदेहंत्वितिपाठेत्र

138

अंतकालेह्युपासंतेतपसादग्धकिल्बिषाः सर्वस्तेमहात्मानोगच्छंतिपरमांगतिं २८ सूक्ष्मंविशेषणांतेषामवेक्षे
च्छास्त्रचक्षुषा देहंतुपरमंविद्याद्विमुक्तमपरिग्रहं २९ अंतरिक्षाद्न्यतरंधारणासक्तमानसे मर्त्यलोकाद्विमु
च्यंतेविद्यासंसक्तचेतसः ३० ब्रह्मभूताविरजसस्ततोयांतिपरांगतिं एवमेकायनंधर्ममाहुर्वेदविदोजनाः ३१ ॥

यक्तमेवपरमंचर्मविशेषणांनततःपरमन्यद्द्वेयमस्तीत्यर्थः विमुक्तमपरिग्रहमित्यादिपादेनश्लोकएकंवाक्यंवितनुक्तंस्थूलदेहाध्यासहीनंअपरिग्रहंसत्या
सिनं २९ धारणासक्तमानसंयोगिनंअंतरिक्षात् अंतरिक्षंहार्दाकाशस्तमारभ्यआमतरंईशंसूत्रात्मानंवाविद्यादित्यर्थः मर्त्येति यत्किंचित्श्रोतोपास्ति
युक्तःमर्त्यदेहादिस्तुच्यतेततः। शरीरहक्रमेणापरांगतिंयांति ३० एकायनंएकंब्रह्मैवायनंप्राप्तिस्थानंयस्मिन ३१ ॥ ॥ ॥ राम०
१३८

कषायेतिरागादिहीनमचलं येषां शास्त्रीयं परोक्षमपि ज्ञानमुत्पद्यते तेपि यथावलं यथावैराग्यं मुच्यंते ३१ भगवंतं सर्वैश्वर्ययुक्तं ३२ आत्मस्थं कोशपंचकांतर्गतं
३४ संक्षेपेण असंदेहं यं चाहं समतावदितो। अस्मिन वास्ति चेत्यनेन रज्जूरगादिवज्जगत भ्रांतां भ्रांतयोर [illegible] स्ति नास्ति चेत्यनिर्वचनीयमित्युक्तं जगन्मिथ्यात्वं

यथा ज्ञानमुपासंतः सर्वे यांति परां गतिं कषायवर्जितं ज्ञानं येषामुत्पद्यते चलं यांति तेपि परांल्लोकान्विमुच्यंते यथावलं
३१ भगवंतमजं दिव्यं विष्णुमव्यक्तसंज्ञितं भावेन यांति शुद्धा ये ज्ञानतृप्ता निराशिषः ३२ ज्ञात्वात्मस्थं हरिं चैव न निव
र्तंति तेऽव्ययाः प्राप्य तत्परमं स्थानं मोदंतेऽक्षरमव्ययं ३४ एतावदेतद्विज्ञानमेतदस्ति च नास्ति च तस्मावद्धं जगत्सर्वं चक्रव
त्परिवर्त्तते ३५ बिसतंतुर्यथैवायमंतस्थः सर्वतो बिसे तस्मात्तंतुरनाद्यंतस्तथा देहगतः सदा ३६ सूच्यास्त्रं यथावस्त्रे
संसारयतिवापकः तद्वत्संसारसूत्रं हि तस्यास्सूच्या निबध्यते ३७ विकारं प्रकृतिं चैव पुरुषं च सनातनं यो यथावद्विजाना
ति स वितृष्णो विमुच्यते ३८ प्रकाशं भगवानेतदृषिर्नारायणोऽमृतं भूतानामनुकंपार्थं जगाद जगतो गतिः ३९ शांतौ मोक्ष
धर्मेषु वार्ष्णेयाध्यात्मं ८ ॥

ज्ञेयं तस्माच्चतमाज्ञेयमर्थः ३५ विसंभ्रमणात्वं ३७ तस्मात्यागो पापमाहविकारमितिकार्यकारणं शुद्धं चज्ञानन्वितस्सो भूत्वा विमुच्यते ३८ प्रकाशं स्पष्टं अमृतं मो
क्षसाधनं ३९ इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनुनीलकंठकृते भारतभावदीपे शांतौ मोक्षधर्मेषु वार्ष्णेयाध्यात्मप्रकाश
स्त्रिचत्वारिंशोध्यायः ॥ ॥

मो०
१३६

135

सर्वसंक्षेपेणपुंप्रकृत्योर्वैधर्म्यमुक्तं।नह्यविवरणात् पंचशिखवाक्यमध्याहृत्यवक्ष्यमाणकथनात् तस्मात्त्यागोमुख्यंमुक्तिसाधनंसचराज्ञोदुःशकइतिमन्वानःमिथि
लायांप्रदग्धायांनमेकिंचनदह्यतीतिपूर्वोक्तंस्वमतविरुद्धंजनकवचनंस्मरन्तद्वृत्तंपृच्छतिकेनेति १ महत्सुखंमोक्षं २ जनकोजनकवंशजःनाम्नाजनदेवः

युधिष्ठिरउवाच केनवृत्तेनवृत्तज्ञजनकोमिथिलाधिपः जगाममोक्षंमोक्षज्ञोभोगानुत्सृज्यमानुषान् १
भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनं येनवृत्तेनवृत्तज्ञःसजगाममहत्सुखं २ जनकोज
नदेवस्तुमिथिलायांजनाधिपः और्ध्वदेहिकधर्माणामासीद्युक्तोविचिंतने ३ तस्यस्मशतमाचार्यावसं
तिसततंगृहे दर्शयंतःपृथग्धर्मान्नानाश्रमनिवासिनः ४ ॥ ॥ ॥ ॥ ॥

ऊर्ध्वंदेहाद्दीप्तस्थूलदेहमशरीरंब्रह्मतत्प्राप्तिकराणांऔर्ध्वदेहिकानांविचिंतनेयुक्तोऽवहितआसीत् ३ धर्मान्उपासनामार्गान्पाठांतरे।पा
षंडाःलोकायतादयःतेषांवादिनःप्रतिभटस्वनेतारःपाखंडवासिनइतिपाठे पाखंडान्वासयंतिआच्छादयंतितिरस्कुर्वंतितेतथा ४ ॥

राम०
१३६

तत्रकेचित्पाखंडादेहनाशादात्मनाशमिछंति अन्येपुनर्देहस्यैवनाशंनेछंति तत्राद्येजगद्वैचित्र्यानुपपत्तिमंत्येप्रत्यक्षविरोधंचोद्भावयंतस्तेषांप्रेत्यभावे
अस्माद्देहादुत्क्रम्यभावेसत्तायांप्रेत्यजातौजन्मांतरलाभेचविषयेविनिश्चयेसभूयिष्ठंनतुष्यतियतःआगमस्थः तत्रतार्किकाणांविप्लुतानामात्मनांपू
र्वदेहेंद्रियवियोगोमरणंअपूर्वदेहेंद्रियसंबंधोजन्मेतिविनिश्चयः सांख्यानांतुआत्मनांकरणानांचविप्लुतानामेवसतांअरणिपाषाणगतेरिवतत्रतत्रवह्निला
भोजन्मवह्निविलयोमृत्युरितिविनिश्चयः तथाकर्त्ताभोक्ताविभुरात्मेतिपूर्वेषामात्मतत्वेपरेषांतुभोक्तैवनकर्त्तेतितत्रापारवंद्वत्वात्किंचिन्नतुष्यत्व

सतेषांप्रेत्यभावेचप्रेत्यजातौविनिश्चये आगमस्थःसभूयिष्ठमात्मतत्वेनतुष्यति ५ तत्रपंचशिखोनामकापिलेयोमहा
मुनिः परिधावन्महींकृत्स्नांजगाममिथिलामपि ६ सर्वसंन्यासधर्माणांतत्वज्ञानविनिश्चये सुपर्यवसितार्थश्चनिर्द्वंद्वोन
ष्टसंशयः ७ ऋषीणामाहुरेकंयंकामादवसितंनृषु शाश्वतंसुखमत्यंतमन्विच्छंतंसुदुर्लभं ८ यमाहुःकपिलंसांख्याः
परमर्षिंप्रजापतिं समन्येतेनरूपेणविस्मापयतिहिस्वयं ९

पिभूयिष्ठंनतुष्यति आगमविरोधात् आगमोहिस्वप्नवत्पूर्वदेहनाशोत्तरदेहप्राप्तीवदति आत्मानंचाकर्त्तारमभोक्तारमेकंचनतेषामितिपाठे आत्मतत्वेनेतितृतीया ५
कापिलेयःकपिलायाःपुत्रः परिधावन्एकत्रवासमकुर्वन् ६ सुपर्यवसितार्थः सम्यङ्निश्चितप्रयोजनः ७ कामैरनावृतंकामादवसितमितिपाठे यदृच्छयाप्राप्तेनासुखंअन्वि
च्छंतंस्थापयितुमितिशेषः ८ सःकपिलः तेनपंचशिखसंज्ञेनतच्छिष्यत्वात्तत्तुल्यतं ९

मो० पंचस्रोतोंसिविषयकेदारप्रणालिकाःयस्यतस्मिन्मनसिमानंसंसत्रमितर्पः १० यत्रयत्समीपेकापिलंकापिलमतानुसारिमंडलम्मुनिसमूहंप्रतिपरमार्षपः
१४० न्नवेदयदितिसुत्तेरणासंबंधः पंचस्रोतसिमनसिनिष्णातः ऊहापोहकौशलवान्पंचरात्रोनामविष्णुत्वप्रापकः क्रतुःपुरुषोहवैनारायणोऽकामयततातिष्ठेयः ॐस
र्वाणिभूतान्यहमेवेदंसर्वंस्यामितिसएतंपंचरात्रंपुरुषमेधंयज्ञक्रतुमपश्यदितिशतपथोक्तः तत्रविशारदः अनुष्ठिताखिलकर्मेत्यर्थः ११ पंचत्वअन्नम
यप्राणमयमनोमयविज्ञानमयानंदमयान्कोशान्मिपआत्मनःशवविविक्तान्जानातीतिपंचज्ञः अतएवपंचकृतपंचत्वद्विषयाणामुपासनानिोक्षगुर्वैवास्मिणा
रित्यस्यामुपनिषदिसतपस्तप्त्वान्नंब्रह्मेतिव्यंजनादित्यादिविहितानिकरोतिसपंचकृत् पंचशांतोदांतउपरतस्तितिक्षुः समाहितोभूत्वात्मन्येवात्मानंप

140

आसुरेःप्रथमंशिष्यंयमाहुश्चिरजीविनं पंचस्रोतसियःसत्रमास्तेवर्षसहस्रिकं १० यत्रचासीनमागम्यकापिलंमंड
लंमहत् पंचस्रोतसिनिष्णातःपंचरात्रविशारदः ११ पंचज्ञःपंचकृत्पंचगुणःपंचशिखःस्मृतः पुरुषावस्थमव्यक्तंपर
मार्थंन्यवेदयत् १२॥

इत्यतीतिप्रोक्ताः शांत्यादयोगुणाःयस्मिन्सपंचगुणःततएवब्रह्मविभक्तैवभवतीतिप्रोक्तेःपंचभ्योतिरिच्यमानत्वात् [illegible] पंचशिखेवेतिपंचशिखंपुच्छंब्रह्म
तस्यज्ञत्वात्मुनिरपिपंचशिखःननुपंचकृत्कथंषड्जःस्यादितिचेत्पृगायपाऽन्नमयंविकारमुपासीनस्तात्प्रकृतिमन्नंविराडाख्यंएति।एवंमायपाविकृतमा
नंदंआनंदमयाख्यमुपास्याविकृतमानंदंतत्प्रकृतमेतीतिनषड्ज्ञयास्तिःपृथगवक्तव्यापषड्ज्ञानायतस्यपंचमोपास्तिफलत्वात्नानंदेतदाहपुरुषेतिपुरुषा
अन्नमयादयःपंचअवस्थात्वयाबाधिततयातिष्ठंतीयस्मिन्नितिपुरुषावस्थंअतएवशिरआघवयवरहितत्वादव्यक्तंअबाध्यत्वाच्चपरमार्थंअवोधयत् १२ मो० १४०

तस्यापिगुरुर्मोहेशेत्यादिना। दृष्टसत्रेणात्रात्मपक्षेनेहेतौतज्जीपाऽध्यापनेनवसतीतिव्रतसम्यक्पृष्टंप्रश्नोपसस्यसंपृष्टः आत्मज्ञानार्थंकृतप्रश्नइत्यर्थः
व्यक्तिंवाध्यत्वावाध्यत्वेनसाक्षात्तोदेवदर्शनःदिव्यदृष्टिरित्यर्थः १२ सांख्यसंमतगुणपुरुषांतरज्ञानात्कैवल्यंप्रधानंचोपादानमितिपक्षंनिरस्यतियत्तदिति।

इष्टसत्रेणासंसृष्टोभूयश्चतपसासुरिः क्षेत्रक्षेत्रज्ञयोर्व्यक्तिंबुबुधेदेवदर्शनः १२ यत्तदेकाक्षरंब्रह्म
नानारूपंप्रदृश्यते आसुरिर्मंडलेतस्मिन्प्रतिपेदेतदव्ययं १३ तस्यपंचशिखःशिष्योमानुष्यापयसाभृतः
ब्राह्मणीकपिलानामकाचिदासीत्कुटुंबिनी १४ तस्याःपुत्रत्वमागम्यस्त्रियाःसपिबतिस्तनौ ततःसका
पिलेयत्वंलेभेबुद्धिंचनैष्ठिकीं १५ एतन्मेभगवानाहकापिलेयस्यसंभवंतस्यतत्कापिलेयत्वंसर्ववित्त्वम
नुत्तमं १६ सामान्यंजनकंज्ञात्वाधर्मज्ञोज्ञानमुत्तमं उपेत्यशतमाचार्यान्मोहयामासहेतुभिः १७ जन
कस्त्वभिसंरक्तःकापिलेयानुदर्शनात् उत्सृज्यशतमाचार्यान्पृष्टतोनुजगामतं १८ तस्मैपरमकल्या
यप्रणतायचधर्मतः अब्रवीत्परमंमोक्षंयत्तत्सांख्यमभिधीयते १९ ॥ ॥ ॥ ॥

अक्षरमेवजगदुपादानंतयानानारूपंनतुक्षरंप्रधानं अव्ययंब्रह्मैवप्रतिपेदेज्ञातवान्नतुगुणपुरुषांतरं १५ भगवान्मार्कंडेयःसनत्कुमारोवा १६
सामान्यंसर्वेषामाचार्येषुसमबुद्धिं १७ अभिसंरक्तोभक्तः १८ कल्यायसमर्थायसांख्येउपनिषत्कांडेभिधीयतेअपूर्वत्वायाप्यतेनतुयुक्त्याउन्नीयते १९ ॥
२१

जातिर्ज्जन्म कर्म्मयागादि सर्वं च लोकांतांतेषु निर्वेदो दुःखरूपत्वाद्दोषयुक्तत्वात्क्षयिष्णुत्वाच्च १० तं मोहमब्रवीदिति पूर्वेणान्वयः तं कं यस्य मोहस्यार्थे
कर्मतत्फलं च कांक्षते अनाश्वासिकं अविश्वसनीयं मुक्तिरेतत्ताव सद्विषयप्रदर्शकत्वात् विनाशि चलं ध्वंसि अनियतकालं च अध्रुवं सत्वासत्वेन वा अ
निश्चितं २१ तमित्यत्र मतस्मिंस्तु बुद्धिलक्षणं मोहं विवर्णं तु लोकायतानां मतमुपन्यस्यति दृश्यमाने इत्यादिना ते हि पार्थिवाप्यतैजसवायवीयाः परमाणवः
खरस्नेहोष्मेरणस्वभावाः स्वयमेव देहाद्याकारेण संहन्यमानानामदशक्तिवैचित्र्यं जनयंतीति देहे एव न तु घटादौ स्वभावादिति संतमात्मानं नास्तीत्याहुः

जातिनिर्वेदमुक्त्वा स कर्मनिर्वेदमब्रवीत् कर्मनिर्वेदमुक्त्वा च सर्वनिर्वेदमब्रवीत् २० यदर्थं धर्मसंसर्गः कर्मणां
च फलोदयः तमनाश्वासिकं मोहं विनाशि चलमध्रुवं २१ दृश्यमाने विनाशे च प्रत्यक्षे लोकसाक्षिके आगमा
त्परमस्तीति ब्रुवन्नपि पराजितः २२ अनात्मा ह्यात्मनो मृत्युः क्लेशो मृत्युर्जरामयः आत्मानं मन्यते मोहात्तदस
म्यक्परं मतं २३

असंतं च देहं संतमाहुस्तदेतदाह। विनाशे देहरूपात्मध्वंसे प्रत्यक्षे सति देहात्परं आत्मतत्वं आगमप्रमाणादपि अस्तीति ब्रुवन् लोकविरुद्धागमप्रामाण्यवा
दी पराजित एवेत्यर्थः २२ ननु देहस्यैवात्मत्वे स्वर्गकामो यजेतेत्यादयः परलोकफलास्वादनाउपरुध्येरन्निमामाशंकामाहानात्मेति द्वाभ्यां आत्मनो मृत्युः अना
त्मा स्वरूपाभाव एव। क्लेशो दुःखं जरा वयोहानिः आमयो रोगश्च आत्मनो मृत्युरेव अंशेन स्वरूपनाशः गृहस्येव दुर्बलदुर्बलतरांगपूर्वपूर्वतरेनश्यति सांशे
न गृहनाश एवं इंद्रियादिनाशेनाप्यंशत आत्मैव नश्यतीत्यर्थः। एवं सति य आत्मानं मोहात्परं देहादन्यं मन्यते तत्तन्मतं असम्यक् २३ ॥ ॥

स्वर्गकामचोदनात्तु यपाराशोऽजरत्वामरत्वाद्याशीरुपचारः एवं दृष्टसुखे एव स्वर्गोपचारः तस्माद्भूमस्याग्नेर्दिवाद्दर्शनार्चिः तस्मादेव चिरं वाग्नेर्न क्रंदद्दृशेन धूमइत्या
दिवत्प्रत्यक्षविरुद्धाम्कीर्तिर्नस्वार्थप्रमाणामित्याहापिततिपाहि अग्निहोत्रादेवैयर्थ्यमुदाहरंति अग्निहोत्रं त्रयीधर्मस्त्रिदंडं भस्मगुंठनं बुद्धिपौरुषहीनानांजीवि
केति बृहस्पतिरिति २४ एवं प्रत्यक्षविरोधात्स्कीतिप्रामाण्यं दूषयित्वाव्याप्तिग्रहादनुमानस्यापि तद्दूषयति अस्ति नास्तीति यथा चंद्रतारके गतस्य भावो वास्ति नास्ती

अथ चेदेवमप्यस्ति यल्लोकेनोपपद्यते अजरोऽयममृत्युश्च राजासौ मन्यते यथा २४ अस्ति नास्तीति चाप्येतन्नास्मि
न्नसति लक्षणे किमधिष्ठाय तद्रूयाल्लोकयात्राविनिश्चयं २५ प्रत्यक्षं हेतयोर्मूलं कृतांतैतिह्ययोरपि प्रत्यक्षेणा
गमोभिन्नः कृतांतो वा न किंचन २६ यत्र यत्रानुमानेस्मिन्कृतं भावयतेपि च नान्यो जीवः शरीरस्य नास्तिकानां
मतेस्थितः २७

ति संशयेऽस्ति गतस्य तु पलब्धेरिति प्राप्ते नास्ति देशांतरप्राप्तेरित्यनुमानेन यत्गत्यादि साधनं तदपि असति लक्षणे ज्ञापके हेतौ शक्तः सहचरितयोरपि व्यभिचारद
र्शनादसति किं लिंगमधिष्ठाय आलंब्य लोकयात्राव्य[illegible]ादि व्यवहारविनिश्चयं ब्रूयान्न किमपीत्यर्थः २५ कृतांतैतिह्ययोः अनुमानागमयोः भिन्नः बाधि
तः न किंचन प्रमाणमित्यर्थः २६ फलितमाह यत्रेति यत्र कुत्राप्यनुमाने ईशादृष्टनित्यात्मान्यतमसाधके साध्यसिद्धं भावयतः कृतं अलं भावनयालमित्य
र्थः उक्तविधयाऽनुमानस्याप्रमाणत्वात् शरीरस्य शरीरात् २७ ॥

फ१

मो० १४२

अनुमानस्यप्रामाण्योपगमेतुततस्वदेहादन्यात्मसिद्धिरित्याद्दूरेतइति यथासमानेपिभूतचतुष्टयसंयोगेवटकणिकांयांवटपत्रपुष्पफलमूलत्वगादिरू
पस्सादयोंतर्हिताःस्वंतन्त्रतरेतसिसमानेप्युपष्टंभकभागेमनोबुद्ध्यहंकारचित्तशरीराकारगुणादयोंतर्हिताःसंतत्राविर्भवंति यथावाएकस्मादेव
धेनूपभुक्तात्तृणादेकातपयःसर्पिषीपृथक्पृथकत्वभावे यथावावहुद्रव्यकल्कादित्रिरात्रमधिवासितान्मदशक्तिरुत्पद्यतएवंरेतसउपलभ्योपल
ब्धेशोवाभूतसंयोगाद्वाचैतन्यंजन्यते जातिर्जन्मान्तरादेः यथावाकाष्ठद्वयसंश्लेषात्तत्प्रकाशकोग्निर्जायतएवंभूतयोगादपितत्प्रकाशकंचैतन्यमुत्पद्य

रेतोवटकणीकायांघृतपाकाधिवासनं जातिस्मृतिरय
स्कांतःसूर्यकांतोंबुभक्षणं १८

तेइति जडद्वयादजडोत्पत्तौदृष्टांतान्तरंपराभिमतंस्मृतिरितियथातर्कमतेजडयोरप्यात्ममनसोर्योगादजडंस्मृत्यादिरूपंज्ञानंजायतेतद्वदत्रा
पिभविष्यतिएवमुत्पन्नेचैतन्येअयस्कांतमणिर्लोहमिवइंद्रियसंघातंचालयिष्यति कार्यवैचित्र्यमणिपार्थिवांशगतजातिभेदादेवभविष्यतिसू
र्यकांतयोगादेवसूर्यरश्मयोग्निंस्रुवतेनपृथ्व्यंतरयोगात्तद्वत् एवंभोक्तृत्वेवक्ष्येजलशोषकत्ववत्संघातस्यैवयुज्यतेइतियुक्तंशरीरादन्योजीवोना
स्तीति १८

राम० १४२

एतद्दूषयति प्रेत्येति प्रेत्य मृते देहे चैतन्यात्ययो देहातिरिक्तात्मास्तित्वे प्रमाणमित्यध्याहृत्य योज्यं यदि देहस्यैव चेतनः स्यात्तर्हि मृतेपि देहे चैतन्यमुप
लभ्येत ततो न देहधर्मश्चैतन्यमित्यर्थः प्रेत्य मृतात्यय इति पाठे मृत्वा मृतनाशः यस्मिन्मृतेपि देहो न नश्यति अस्ति च न नश्यति स देहादन्य इत्यर्थः तपःशी
तद्वारनिवृत्त्यर्थमंत्रप्रतिपाद्यादेवतालोकापत्तिके न प्राप्यते सा चेन्मृतमपी स्यात्तर्हि घटादिवद्दृश्येत सूक्ष्मशरीरस्य लोकांतरसंचारक्षमस्या
स्वीकारात् आदिपदात् भूतावेशोपि ग्राह्यः यस्मिन् शरीरे भूतांतरमाविशति तदा तद्देहपीडया मुख्यो देहपतिर्नवाध्यते किंतु आविष्ट एव तदा

प्रेत्यभूतात्ययश्चैव देवताद्युपयाचनं मृते कर्मनिवृत्तिश्च प्रमाणमिति निश्चयः २९
न त्वेते हेतवः संति ये केचिन्मूर्त्तिसंस्थिताः अमर्त्यस्य हि मर्त्येन सामान्येनोपलभ्यते ३०

नीतस्यैव देहाभिमानात् तदपगमे तु मुख्य एव वाध्यते ऽतो न देह आत्मा दृष्टविरोधादित्यर्थः मृते कर्मनिवृत्तिः कृतनाशः चात् तत्प्राप्तौ अकृताभ्या
गमश्च दोष इत्यर्थः २९ एवं स्वमते साधकानुक्त्वा परोक्तान्हेतूनाभासयति न त्वेत इति मूर्त्तिसंस्थिताः जडमेवाश्रित्य कमिति सर्वे पूर्वोक्ता हे
तवः जडात् जडसिद्धावेव पर्यवस्यंति न त्वजडसिद्धौ हि यस्मात् मूर्त्तादमूर्त्तस्य ज्ञानं स्यात् तौ पृथिव्यादिचतुष्टयादाकाशोप्युत्पद्येतेत्यर्थः सामा
न्यं सादृश्यं कार्यकारणयोः सहावगतं मद्यघटादौ न तु मूर्त्तामूर्त्तयोरत्यंतविलक्षणयोस्तदुपपद्यते यदपि तर्कमतं जडयोरात्ममनसोर्योगा
दजडं ज्ञानमुत्पद्येत तदपि दृश्याहृष्टजन्मासंभवात्मतमात्रमेव ३०

मो० एवंलोकायतमतं निरस्य सौगतमतं निरसितुमुपन्यस्यति अविद्येत्यादिभिस्त्रिभिः तेहि लोकायताभिमतात्संघाताद्बाह्यादन्यं आध्यात्मिकं संघातं रूपविज्ञा
१४३ नवेदनासंज्ञासंस्काराख्यपंचस्कंधात्मकं ऐहिकामुष्मिकव्यवहारास्पदं अभ्युपगच्छंति। अतो न तेषां प्रेतीभूतानामपादयो दोषाः संति। यद्यप्येतेषामपीतरवत्
स्थिरो भोक्ता प्रशासिता वा चेतनः संहंता नास्ति तथापि अविद्या १ संस्काराः २ विज्ञानं ३ नाम ४ रूपं ५ षडायतनं ६ स्पर्शो ७ वेदना ८ तृष्णा ९ उपादानं १० भ
वो ११ जातिः १२ जरामरणं १४ शोकः १५ परिदेवना १६ दुःखं १७ दुर्मनस्ता १८ इत्यष्टादशकं चित्तसंक्षेपेण क्वचिद्विस्तरेण चोक्ताः सर्वेषां सौगतानामप्रत्या

143

अविद्याकर्मतृष्णानां केचिदाहुः पुनर्भवे कारणं लोभमोहौ तु दोषाणां च निषेवणं ३१
अविद्यां क्षेत्रमाहुर्हि कर्म बीजं तथा कृतं तृष्णा संजननं स्नेहमेषं तेषां पुनर्भवः ३२

ख्यपाः पूर्वपूर्वे उत्तरोत्तरेषां निमित्तभूताः घटीयंत्रवद्वावर्त्तमानाः संघातं स्वाश्रयतयाऽऽक्षिपंति। षडायतनं शरीरं चित्तस्य स्कंधपंचकस्य तदुपादानस्य पु
ष्टस्य चित्तस्य च आश्रयभूतत्वात्। एवं च संघातो यत्नेन लोकमात्रापाश्वनिर्वाहे सति न स्थिर आत्माभ्युपपद्यत इति वदंति तत्राविद्या स्वशब्दोपात्ता कर्म
चेष्टा लोभमोहशब्दैः संस्कारोपादानतृष्णादुर्मनस्ताः इतरे दोषपदेन संगृहीताः। केचित्सौगता अविद्यादिकं पुनर्भवे देहांतरप्राप्तौ कारणमाहुरि
ति योजना ३१ एतदेव स्पष्टयन्नविद्येति अविद्यां क्षेत्रं पूर्वकृतं कर्म बीजं तृष्णा स्नेहाश्रयजलरूपां एवं प्रकारस्तेषामविद्यादीनां पुनर्भवः पुनः पुन- रा०
उत्पत्तिप्रकारः ३२ ३२ १४३

तस्मिन्अविद्यादिकलापेगूढेसुप्तिप्रलययोः संस्कारात्मनास्थितेनिमित्तभूतेसतिएकस्मिन्मरणाधर्मिणिदेहेभिन्नेवि नष्टेपिअन्योन्यान्नत एवाद्यादे
देहोन्यः जायते।तस्मिन्ज्ञानेनदग्धेचसतिदेहनाशात्सत्वसंक्षयंमोक्षमाहुः सत्वस्यधीधातोः संक्षयः सम्यगैश्वर्यमितिविषयप्रवाहित्वंकैवल्यमित्याहुः
३३ एतद्दूषयतियदेति।स्वरूपतोनन्तंमुक्तावपिक्षणिकानांविज्ञानादीनांयद्वाचजातीतः आलयविज्ञानंबाह्यविज्ञानमितितेषामनन्तत्वंयद्वाचशुभतः

तस्मिन्गूढेचदग्धेचभिन्नेमरणधर्मिणि अन्योस्माज्जायतेदेहस्तमाहुः सत्वसंक्षयं ३३ यदासरूपतश्चा
मोजानितःशुभतोर्थतः कथमस्मिन्मुइत्येवसंबंधस्यादसंहितं ३४ एवंसतिचकाप्रीतिर्हीनविद्यातपोब
लैः यदस्माचरितंकर्मसर्वमन्यत्प्रपद्यते ३५ अपिह्यपामिहैवान्यैः प्राकृतैर्दुःखितोभवेत् सुखितोदुः
खितोवापिदृश्यादृश्यविनिर्णयः ३६

शुभा शुभतः पुण्यपापतः अर्थतः बंधमोक्षतः विज्ञानानांपृथक्पृथक्त्वंतदाबाह्यैकरूपंसोयमित्यभेदप्रत्यभिज्ञानंप्राकृदृष्टस्यघटस्ये
ववार्त्तमानिकादन्यत्वात्।एवंच असंहितंअनभिसंहितंभोगमोक्षादिकरूपंवास्यात्अन्योमुमुक्षुरन्यः साधनाविष्टोऽन्योमुक्तइत्यापत्तेः
३४ एवंचसतिदानाद्यपानर्थकंफलभोगकालेदातुरभावादित्याहएवमिति।अन्येनविज्ञानेनाचरितंअन्यत्विज्ञानांतरंप्रतिप्रवर्त्तेतेफ
लंदातुंगच्छति ३५ इष्टापत्तिमाशंक्याहापीति।अनन्तत्वाविशेषाच्चैत्रपुराणेपिमैत्रः सुखीभवेदित्यर्थः दृश्यः स्पष्टः ३६

तथाहीति चैत्रज्ञानान्मैत्रज्ञानं पृथक् विसदृशं येन तैव ज्ञातेन न स्मर्यते तत्पूर्वस्थितो कोक्तं दूषणं नोपपद्यतेऽतः चैत्रज्ञानधारैव सजातीया विवक्षितेति चेत्तर्हि उत्पद्य
मानस्य सदृशज्ञानस्य किं उपादानं न तावत् पूर्वज्ञानं तस्य क्षणिकत्वेन उत्तरोत्पादे व्यापारायोगात् तत्राशश्वतमुसलैर्हतात् शरीरादपि अन्यत् शरीरं पुन
र्भवेत् ३७ किंच कृत्वादिवज्ञातोपि मोक्षः पुनःपुनरागत्य निवर्तेत ज्ञानधारायाः आनंत्यादित्याह ऋत्विति तिष्यः कलिरिति पुंनामुपलक्षणं बहुदोषय
स्तत्वाक्षणिकविज्ञानवादोनुपपन्न इत्यर्थः ३८ अस्तु तर्हि विज्ञानानामाश्रयः स्थिरः कश्चिदात्मेति तर्कमतमाशंक्याह जरयेति उपपन्नप्रपन्नधर्मावि

144

तथाहि मुसलैर्हन्तुः शरीरं तत्पुनर्भवेत् पृथग्ज्ञानं यदन्यच्च येनैतन्नोपलभ्यते ३७ ऋतुसंवत्सरो तिष्यः शीतोष्णे
यप्रियाप्रिये यथातीतानि पश्यंति तादृशः सत्वसंक्षयः ३८ जरयाभिपरीतस्य मृत्युना च विनाशिना दुर्बलं दुर्बलं पू
र्वं गृहस्येव विनश्यति ३९ इंद्रियाणि मनो वायुः शोणितं मांसमस्थि च आनुपूर्व्या विनश्यंति स्वं धातुमुपयांति
च ४० लोकयात्राविघातश्च दानधर्मफलागमे तदर्थं वेदशब्दाश्च व्यवहाराश्च लौकिकाः ४१ ॥ ॥

करोतीति हि धर्मिणामिति न्यायेनानित्यधर्माश्रयस्य धर्मिणोऽप्युक्तवत्पक्षयादिना नाश इत्यर्थः ३९ अनित्यधर्माश्रयोप्याकाशादिवन्न नश्यतीत्याशंक्याह इंद्रिया
दिवन्नश्यत्येवेत्याह इंद्रियाणीति मनसो नाशः सांख्यसंमतः प्रोक्तः ४० अस्तु तर्हि बुद्ध्यादिगुणानामनाश्रयः शुद्धस्तर्हि अकर्तुर्भोक्तुश्च तस्य दानादिफ
लाप्राप्तौ दानादिवैयर्थ्यं तस्मात् सर्वस्यापि आत्मसुखार्थस्य लोकवेदव्यवहारस्योच्छेद इत्यर्थः ४१ ॥ ॥ ॥ ॥

इतीतिामनः प्रभवेष्वनेकेषु तर्केषु पन्नगाः त्वत्तेरपि निर्धारयितुं न शक्यत इति भावः ४२ विमृशतां विचारयतां ४३ निराशायकं मानमाहरेवमिति ४४
वेदोदितज्ञानेन विवक्षितेश्रोतुरधिकारसंपन्नं विधत्ते। अर्पणीत्यादिना ४६ रतिः शरीरे ४७ अनुपधिक्रमविप्रलंभादिरहितं वेदमूलकत्वात्।

इति समग्रं न सेतेन बहवः संति हेतवः एतदस्तीदमस्तीति न किंचित्प्रतिदृश्यते ४२ तेषां विमृशतामेव तत्तत्स
मभिधावतां क्वचिन्निविशते बुद्धिस्तत्र जीर्यति वृक्षवत् ४३ एवमर्थैरनर्थैश्च दुःखिताः सर्वजंतवः आगमैरप
कृष्यंते हस्तिपैर्हस्तिनो यथा ४४ अर्थांस्तथात्यंतसुखावहांश्च लिप्संत एते बहवो विशुष्काः महत्तरं दुःखम
नुप्रपन्ना हित्वामिषं मृत्युवशं प्रयांति ४५ विनाशिनो ह्यध्रुवजीवितस्य किं बंधुभिर्मित्रपरिग्रहैश्च विहा
य यो गच्छति सर्वमेव क्षणेन गत्वा न निवर्तते च ४६ भूर्व्योमतोयानलवायवोपि सदा शरीरं प्रतिपालयंति इ
तीदमालक्ष्य रतिः कुतो भवेद्विनाशिनो ह्यस्य न शर्म विद्यते ४७ इदमनुपधि वाक्यमच्छलं परमनिरामयमा
त्मसाक्षिकं नरपतिरभिवीक्ष्य विस्मितः पुनरनुयोक्तुमिदं प्रचक्रमे ४८ शांतो मोक्षधर्मेषु पंचशिखवा
क्ये ॥ ॥

अच्छलं वैदिकमपि कर्मकांडवन्मायामूलं वा अनुयोक्तुं पूर्वपक्षं कर्तुं ४८ पंचशिखवाक्योपाख्याने खंडनं चतुश्चत्वारिंशः ॥ ॥ ॥ ॥ ॥

ज्ञपितः निशामितः निशामनेमित्वात्कृस्वत्वं एतदस्तीदमस्तीति न किंचित्प्रतिदृश्यत इत्यनेकमतोपन्यासपूर्वकं जगतोऽनिर्वचनीयत्वं श्रावितः सांपरायेभ
रगो भवाभवौ संसारमोक्षौ १ ननु यदि सत्वासत्वाभ्यामनिर्वचनीयः संसारस्तर्हि रज्जुरगवन्निस्तत्वस्य तस्य विनाशाय यत्नो निष्फलः नित्यनष्टत्वात्तस्येति शंक
ते भगवन्निति प्रेत्य प्रमातृत्वादेरुच्छन्नसंज्ञाविशेषविज्ञाने सुप्तिमूर्छावत् अनंतविस्मृतिरूपे मोक्षेपि नास्ति चेत् ज्ञानाज्ञानकृतो न कश्चिद्विशेषोस्ति २ तत

भीष्मउवाच जनकोजनदेवस्तु ज्ञपितः परमर्षिणा पुनरेवानुपप्रच्छ सांपराये भवाभवौ १ जनकउवाच भगवन्यदि न प्रे
त्य संज्ञा भवति कस्यचित् एवं सति किमज्ञानं ज्ञानं वा किं करिष्यति २ सर्वमुच्छेदनिष्ठं स्यात्पश्य चैतद्द्विजोत्तम अप्रमत्तः
प्रमत्तो वा किं विशेषं करिष्यति ३ असंसर्गो हि भूतेषु संसर्गो वा विनाशिषु कस्मै क्रियेत कल्प्येत निश्चयः कोत्र तत्वतः
४ भीष्मउवाच तमसा हि प्रतिच्छन्नं विभ्रांतमिव चातुरं पुनः प्रशमयन्वाक्यैः कविः पंचशिखोब्रवीत् ५ ॥ ॥

श्च यत्नवैष्फल्यमित्याशंक्याह सर्वमिति उच्छेदनिष्ठं आत्मनाशपर्यवसायि सर्वं यमनियमादि ३ असंसर्ग इति यदि मोक्षे भूतेषु दिव्यांगनादिषु संस
र्गो नास्ति सन्नपि संसर्गः स्वर्गवद्विनाशिष्वेव चेत्स्यात् तर्हि अतिशयाभावात्कस्मै फलाय कोत्र तत्वतो निश्चयः क्रियेत क्रियमाणो वा कथं कल्प्येत घ
टेत तस्मादविनाशिस्वर्गसुखमेव मोक्षः स च निर्वचनाय एवेत्याशयः ४ कविः क्रांतदर्शी ५

श्री

विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति देहाद्युत्थितस्य उपाधिविशिष्टस्वरूपस्य नाशाद्विशेषविज्ञानाभावे याज्ञ
वल्क्येनोक्ते मैत्रेय्योक्तआत्मोच्छेदबुद्ध्या अत्रैव मा भगवान्मूमुहदिति तमुपालब्धे सति न वा अरे मोहं ब्रवीमीत्यादिना पुनर्याज्ञवल्क्येन बोधिता तद्वदिहापि व्याकुले
राजानं आश्वासयत्येवं न उच्छेद इति उच्छेदनिष्ठा नाशेपर्यवसानं न नापि भावनिष्ठा विशेषपर्यवसानमस्ति किंतु अविषयात्मन्यारोपितं बुद्धीन्द्रियादिकं र
ज्जूरगवत् केवलमपोद्यते तावतैवानर्थनिवृत्तिः स्वरूपानंदस्य च कंठगतविस्मृतचामीकरवत्प्राप्तिरिति कृतकृत्यतास्ति अतस्तदर्थोपन्यासेन निष्फल इति भा
वः तथा च श्रुतिः अविनाशी वा अरे यमात्माऽनुच्छित्तिधर्मा मात्राऽसंसर्गस्त्वस्य भवतीति मात्राप्रमात्रा अनर्थस्य प्रमातृताप्रमुखं कर्तृत्वभोक्तृत्वमिति जिदस

उच्छेदनिष्ठा नेहास्ति भावनिष्ठा न विद्यते अयं ह्यपि समाहारः शरीरेंद्रियचेतसां वर्त्तते पृथगन्योन्यमुपाश्रित्य क
र्मसु ६ धातवः पंच धातारो यं खं वायुर्ज्योतिषो धरा तेस्वभावेन तिष्ठंति वियुज्यंते स्वभावतः ७ ॥ ॥ ॥ ॥

संसर्गो मोक्ष इति प्रतिपादयति आत्मनि देहाद्यध्यारोप एव बाह्यमित्यादिना समाहारः संघातः अस्मिन्त्रिकेऽन्यतमनाशेपि संघातनाश इत्यन्योन्यमुपाश्रित्येत्यस्या
र्थः ६ शरीरादीनामनात्मत्वं वक्तुं तत्प्रकृतीराह धातव इति धीयते निलीयते कार्यमेष्विति धातव उपादानानि ज्योतिषो धरेत्यत्र पौर्भवेज्जलमित्यपि इत्ये पाठांतरं
सुगमं स्वभावेनेति सांख्यमताभिप्रायेण तेषां हीश्वरकालयोरभावात् जीवानां चोदासीनत्वात् अदृश्येच कार्यत्वेन कारणप्रवर्त्तकत्वात् स्वभावत एव गुणा
नां प्रवृत्तिरिति मतं ७

मो० प्रवृत्तानिभूतानिशरीराकारेणपरिणमंतेइत्याहाकाशइति।यानिखानिसआकाशः यः प्राणः सवायुः यऊष्मासोग्निः यल्लोहितादिस्नेहवत्तदापः
१४६ यत्कठिनमस्थ्यादितत्पृथिवीत्यर्थः नैकधेतिज्ञाणपुंजादिभेदेन ८ शरीरेत्पत्तिमुक्त्वाइंद्रियोत्पत्तिमाह। ज्ञानमिति। शरीरेबुद्धिर्जठरः प्राणश्चसर्वक
र्मसंग्राहकोगणः कुतः यतोत्रइंद्रियाणिपृथक्कंतिःस्तं अर्थाः शब्दादयः स्वभावोऽर्थप्रकाशकत्वं चेतनाघटाद्याकारावृत्तिः मनः संकल्पादिरू
पं एतत्ज्ञानकार्यं वायुकार्यंतुप्राणापानौ तौ च व्यानादीनामप्युपलक्षणं विकारोऽशितपातादिपाचनेनेंद्रियादीनामाप्यायनादिर्जठरकार्यं ९

146

आकाशंवायुरूष्माचस्नेहोयश्चापिपार्थिवः एषपंचसमाहारःशरीरमपिनैकधा ८ ज्ञानमूष्मा
चवायुश्चत्रिविधःकार्यसंग्रहः इंद्रियाणींद्रियार्थाश्चस्वभावश्चेतनामनः प्राणापानौविकारश्च
धातवश्चात्रनिःसृताः ९ श्रवणंस्पर्शनंजिह्वादृष्टिर्नासातथैवच इंद्रियाणीतिपंचैतेचित्तपूर्वंग
तागुणाः १० तत्रविज्ञानसंयुक्तात्रिविधाचेतनाध्रुवा सुखदुःखेतियामाहुरदुःखामसुखेतिच ११ श
ब्दःस्पर्शश्चरूपंचरसोगंधश्चमूर्तयः एतेह्यामरणात्पंचषड्गुणाज्ञानसिद्धये १२ ॥ ॥ ॥

श्रवणंश्रोत्रंस्पर्शनंत्वगिंद्रियाणांसाधारणं चित्तंपूर्वंकारणंयस्यापेगणस्यतेचित्तपूर्वंचित्तमात्रोपादानकंगताः प्राप्ताः गुणाः गुणकार्यभूताः १०
विज्ञानसंयुक्ताचित्प्रतिबिंबगर्भाचेतनावृत्तिः विषयस्योपादेयत्वहेयत्वोपेक्षणीयत्वैस्त्रिविधा ११ मूर्तयः रूपाश्रयद्रव्याणि वाय्वाकाशयोरमूर्त राम०
त्वप्युतेबाह्येंद्रियग्राह्यत्वात्पंचशब्दाद्याः मूर्तिभिः सहषट्गुणाः विषयाः ज्ञानंप्रमाणस्यसिद्धयेविषयकरणयोगादिंतज्जायते १२ ॥ ॥ १४६

किंचतेषुश्रोत्रादिषुकर्मस्वर्गसाधनंविसर्गः संन्यासः ब्रह्मलोकदः सन्यासाद्ब्रह्मणः स्थानमितिस्मृतेः सर्वतत्वार्थनिश्चयः मोक्षहेतुः तत्तत्वनिश्चयंपरमंश्रेष्ठंप्रयु
क्तंमोक्षबीजंबुद्धिरितिअव्ययंमोक्षदत्वादव्ययमितिचाहुः महत्ब्रह्मतन्मदत्वात् १३ इममिति अस्मिन्संघातेअनात्मनिआत्मबुद्धिरनर्थहेतुरित्यर्थः १४ एवम
ध्यारोपमुक्त्वाऽपवादमाहानात्मेत्यादिना। इतियद्दृष्टंतदनात्मेतिसंबंधः स्वात्मनिहन्तिविरोधादिदंतयापदृष्टंअहंकारादितत्वआत्मनेत्यर्थः नहिदृश्यंद्रष्टु
रात्मेतियुक्तं तेनकारणेन अहमितिममेतिचनवर्त्तते। यद्यत्राभेदे नप्रतीयतेतन्मिथ्यायथाशुक्तिरजतं अहंकारदेहेंद्रियादिकंचात्मन्यभेदेनप्रतीयतेऽयमह

तेषुकर्मविसर्गश्चसर्वतत्वार्थनिश्चयः तमाहुःपरमंप्रुक्तंबुद्धिरित्यव्ययंमहत् १३ इमंगुणसमाहारमात्मभावेनपश्यतः
असम्यग्दर्शिनैर्दुःखमनंतंनोपशाम्यति १४ अनात्मेतिचयदृष्टंतेनाहंनममेत्यपि वर्त्ततेकिमधिष्ठानाप्रसक्तादुःख
संततिः १५ ॥

मस्मिकारोऽहंगौरोऽहमिति अतोमिथ्यातत्तस्तत्संबंधिममकारास्पदंपुत्रादिकमपिमिथ्या। अतोऽहमितिममेतिचनवर्त्ततइतियुक्तमुक्तं अनात्मेतिहिवि
दृष्टंचनाहंनचममेत्यपीतिपाठेइतिहिइदमितिएवमाकाराप्रतीतिरेतद्दृष्टं स्वार्थेष्यञ् आत्तत्वविद्यापरिसमाप्तिर्यस्यतद्विषयइत्यर्थः सःसर्वोऽप्यनात्माऽतोऽहमिति
नवर्त्ततेममेत्यपिनवर्त्ततइतियोजना। पाठांतरेत्वनाकारं एवंसतियाऽप्रतीयमानादुःखसंततिः साकिमधिष्ठाना आत्मनोऽसंगत्वात् अहंकारस्य
चमिथ्यात्वात् रज्जूरगाभीषणत्ववन्निरधिष्ठानैव यादृशोयक्षस्तादृशोबलिरितिन्यायेनाहंकारवन्मिथ्यैवेत्यर्थः १५ ॥ ॥ ॥ ॥

मो० अत्रेति हंतिर्गुणानार्यंइत्येति शास्त्रेप्रसिद्धः सम्यक्वबोगुणानं पुनःपुनरभ्यसंतेतत्वान्यस्मिन्निति सम्यग्वबोनामसांख्यशास्त्रं सम्यग्ज्ञानइतिपा
१४७ ठेसम्यक्तुसेदेहान्निर्मुक्तमनोयेनेतितदेवत्यागप्रधानंशास्त्रंत्यागशास्त्रं १६ तदेवाहत्यागइति मुक्तानामुक्तयर्पतित्योयुक्तानांपुंसां सर्वकर्मत्याग
स्ववनित्यमतः कर्मणामितिधनादेरप्युपलक्षणंयेतुमिथ्याविनीताः त्यागेविनाशोत्यादिपरास्तेषांक्लेशोविघादिरूपोनततः १७ सर्वशास्त्रत्ता
त्पर्यंत्यागस्वेत्याहद्वेवेति द्रव्यादित्यागनिमित्तंयज्ञकर्मादीन्युपदिशंतीतिशेषः सर्वत्यागनिमित्तंयोगंउपदिशंतियत्तस्मात्त्यागस्यसमापनास

147

अत्रसम्यग्वबोनामत्यागशास्त्रमनुत्तमं प्रणायज्ञवमोक्षायभाष्यमाणंभविष्यति १६ त्यागएषहिसर्वेषांयुक्तानामपिकु
र्मणां नित्यंमिथ्याविनीतानांक्लेशोदुःखवहोमतः १७ द्रव्यत्यागेतुकर्माणिभोगत्यागेव्रतान्यपि सुखत्यागेतपोयोगंसर्व
त्यागेसमापना १८ तस्यमार्गोयमद्वैधःसर्वत्यागस्यदर्शितः विप्रहाणायदुःखस्यदुर्गतिस्तस्यथाभवेत् १९ पंचज्ञानेंद्रि
याण्युक्त्वामनःषष्ठानिचेतसि बलषष्ठानिवक्ष्यामिपंचकर्मेंद्रियाणितु २० हस्तौकर्मेंद्रियंज्ञेयमथपादौगतींद्रियं
प्रजनानंदयोःशेपोविसर्गेपायुरिंद्रियं २१

माप्तिःपराकाष्ठेत्यर्थः १८ तस्येति अयंवक्ष्यमाणोयोगःअद्वैधःप्रकारभेदशून्यःतथाचत्यागस्यैवप्राधान्यंमाल्लविशारिवनःसमामनं
ति।त्यागएवहिसर्वेषांमोक्षसाधनमुत्तमं।त्यक्तोतेवहितंज्ञेयंतस्त्यक्त्वाःप्रत्यक्परंपदमिति। अन्यथात्यागाभावे १९ सांगंगणमाहपंचेति
चेतसिबुद्धौसंतीतिबुद्धित्यागेसर्वाणिसक्तानिस्युरितिभावः।बलंप्राणाशक्तिः २ शेपःशिश्नंपायुर्गुदं २१ ॥ ॥ ॥ राम०
१४७

पंचान्वितं मन इति बुद्ध्वा बुद्ध्या विसृजेत् मनस्त्यागे सविषयाणां कर्मेंद्रियाणां [illegible] त्यागः बुद्धित्यागे समनस्कानां ज्ञानेंद्रियाणां च त्यागः सिद्ध इ
तिप्रघट्टकार्थः २२ एतमेव स्पष्टयति करणेत्यादिना। करणं श्रोत्रं करणं शब्दो विषयः चित्तं कर्तृ श्रवणं क्रिया २३ पंचत्रिकाः सर्वेषामपि विषयकर
णाद्वंद्वानि समनस्कानीति त्रिकाः इत्युक्तं एते गुणाः तदुपलब्धये शब्दादिज्ञानाभिव्यक्तये भवंति येन अनुभवाभिव्यंजनेन निमित्तेन अयं त्रिविधो भावः करण

वाक्शब्दविशेषार्थमिति पंचान्वितं विदुः एवमेकादशैतानि बुध्वाप्युविसृजेन्मनः २१ कर्णौ शब्दश्च चित्तं च त्रयः
श्रवणसंग्रहे तथा स्पर्शे तथा रूपे तथैव रसगंधयोः २३ एवं पंचत्रिका ह्येते गुणास्तदुपलब्धये येनायं त्रिविधो
पापः पर्यायात्समुपस्थितः २५ सात्विको राजसश्चापि तामसश्चापि ते त्रयः त्रिविधा वेदना येषु प्रसूता सर्वसा
धनाः २६ प्रहर्षः प्रीतिरानंदः सुखं संशांतचित्तता अकुतश्चित्कुतश्चिद्वापि चित्तं तः सात्विको गुणाः २७ अतुष्टिः
परितापश्च शोको लोभस्तथाऽक्षमा लिंगानि राजसस्यानि दृश्यंते हेत्वहेतुतः २८

कर्मकर्तृरूपः पर्यायात् एष पर्यायः तथास्ति २५ त्रैविध्यमेवाह सात्विक इति वेदनाः अनुभवाः सर्वान् प्रहर्षादीन् साधयंतीति सर्वसाधनाः २६ इष्टप्र
वणादर्शनप्राप्तिपरिष्वंगजानि सुखानि प्रहर्षप्रीत्यानंदसुखशब्दितानि शांतचित्तता अभुक्ते भुक्ते वाऽनुत्सुकता। अकुतश्चित् वैराग्यात् स्वतएव कुतश्चि
दितीष्टलाभात्। चिंतितो विचारितः चित्तत इति पाठे चित्ततः २७ अक्षमेतिच्छेदः हेत्विति पूर्ववत् २८

मो० १४८

कथंचिदिति हेत्वहेतुभिरित्यर्थः २९ अपेक्षेतेत्युक्ते रुच्यरयोर्हेयत्वमुक्तं ३२ एवं शब्दादीनां श्रोत्रादीनां च त्रिगुणात्मकचित्तमात्रत्वमुक्तं चित्तत्यागेनैव गुणाकरण
विषयाणां त्यागो भवतीति ज्ञानायेदानीं विषयादिभ्योऽनन्यत्वेन शब्दश्रोत्रादीनामुच्यते तेन तत्प्रविलापनेनैव विषयादिप्रविलापनं भवत्वित्येतदर्थं श्रोत्रमिति द्वा
भ्यां आकाशाख्यभूतमेवाकर्णशष्कुल्यवच्छेदेन नभस एव श्रोत्रत्वात् एवं श्रोत्रादीश्रितः शब्दोऽपि परंपराभूतमेवा एवं सति शब्दविज्ञाने उभयं व्योमश्रोत्रे
विज्ञानस्य विषयो नानहि शब्दं ज्ञानं तत् श्रोत्राकाशौ अपि ज्ञायेते तर्हि अज्ञातावेव तौ भवतां किं न स्यादित्याशंक्याह इतरस्य विज्ञानादन्यस्य अज्ञानस्य

148

अविवेकस्तथा मोहः प्रमादः स्वप्नतंद्रिता कथंचिदपि वर्त्तंते विविधास्तामसा गुणाः २९ अत्र यत्प्रीतिसंयुक्तं का
ये मनसि वा भवेत् वर्त्तते सात्विको भाव इत्युपेक्षेत तत्तथा ३० यत्तु संतोषसंयुक्तमप्रीतिकरमात्मनः प्रवृत्तं रज इ
त्येवं ततस्तदपि चिंतयेत् ३१ अथ यन्मोहसंयुक्तं काये मनसि वा भवेत् अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत्
३२ श्रोत्रं व्योमाश्रितं भूतं शब्दः श्रोत्रं समाश्रितः नोभयं शब्दविज्ञाने विज्ञानस्येतरस्य वा ३३ ॥ ॥

वा विषयौ श्रोत्राकाशौ न भवतः शब्दस्य तदुभयानन्यत्वात् न हि घटरूपादिवदाश्रयान्तिकरूपयोः शब्दश्रोत्रयोराकाशगुणाकार्ययोः ग्रहणं प्रविला
पनं वा कर्तुं शक्यं तस्मात् श्रोत्रादिप्रविलापनेनैव तदनन्यशब्दाकाशादेरपि प्रविलापनं युक्तं श्रोत्रादीनां च चित्तादनन्यत्वात् तानि शब्दाकाशादीन्य
पि स्मरणात्मकं चित्तमेव चित्तमपि मनसोऽध्यवसायात्मकादनन्यदिति धीमात्रे सर्वं मनसि लीने लीनं भवतीत्यर्थः ३३ ॥ ॥ ॥ ॥

राम० १४८

३४ सर्वेषां मनोमात्रत्वे युक्तिमाह। स्वकर्मेति। एतेषु दशसु विषयेंद्रियपंचकद्वये एकादशं चित्तमनुगतं तिष्ठतीति विद्धि। घटशरावादिष्विव मृत्तत्रात्र
हेतुः स्वकर्मस्वयुगपद्भाव इति पंचसर्वेषु प्रपन्नास्वेषामिंद्रियविषयाणां कर्माणि श्रवणस्पर्शनदर्शनादीनि तेषामयौगपद्यात्‌ सुप्तोत्थितमात्रस्य पुंसो
लब्धात्मकं मनो युगपदवस्थितान शब्दादीननुभवति। तच्चैतेषां मनस्त्वात्मकत्वाभावेन संगच्छते। उपादाने हि स्वकार्ये युगपत्संगतं भवति। अनुपादाने
तु क्रमेणेति स्पष्टयितु युगपज्ज्ञानानुपलब्धिर्मनसो लिंगमिति ज्ञानायौगपद्यमेवानुपादानस्य मनसः साधकं लिंगमाहुस्तेषां गंगाह्रद इति मग्न
स्य युगपत्सर्वांगीणशैत्यानुभवेन हेतोर्बाध इत्यास्तां तावत्। चित्तस्यापि व्यापिका बुद्धिर्द्वादशी ह्वादशी त्र्याषीमदृष्प्रभपः ३५ तेषां द्वादशानामात्म

एवं त्वक्चक्षुषी जिह्वानासिका चेति पंचमी स्पर्शे रूपे रसे गंधे तानि चेतो मनस्तु तत् ३४ स्वकर्मस्वयुगपद्भावो दश
स्वेतेषु तिष्ठति चित्तमेकादशं विद्धि बुद्धिर्द्वादशमी भवेत्‌ ३५ तेषामयुगपद्भावे उच्छेदो नास्ति तामसः आस्थितो यु
गपद्भावो व्यवहारः स लौकिकः ३६

न्यारोपितानां अयुगपद्भावदृष्टदृष्टोपरक्तं चित्तं सर्वार्थमिति योगप्रसिद्धं चित्तस्य सर्वार्थत्वमिह बुद्ध्यादियुगपद्भाव इत्युच्यते तदन्यो विशे
षविज्ञानराहित्यलक्षणः ज्ञानस्यैयज्ञानयौगपद्याभावस्तामसः निद्रारूपतमोमयः सुषुप्तिकालीनस्तस्मिन्नसत्यपि आत्मनः उच्छेदो नास्ति उ
त्थितस्य सुखमहमस्वाप्समित्यादिपरामर्शात्‌। सता सौम्य तदा संपन्नो भवतीति सुषुप्तौ ब्रह्मसंपत्तिश्रवणात्‌ तस्य एवमुक्तमी तु स्मृतिशब्दविधिभ्यइ
ति मायाया च। अयुगपद्भावस्य एव आत्मनो वास्तवं तज्ज्ञो युगपद्भावस्तु स्वप्नवद्ज्ञानकृत इत्याह। आस्थित इति लौकिको न तु पारमार्थिकः ३६

मो० १४९ व्यावहारिकं युगपन्द्रावमुक्त्वाप्राप्तिभासिकं स्वाप्नकालिकं तमोहेंद्रियाणीति पूर्वश्रुतं श्रवणाक्रियासा च स्पर्शनादीनामप्युपलक्षणं तयाणन्द्वादीनां आ
गमः प्राप्तिः पूर्वानुभववासनातइत्यर्थः सूक्ष्माणि इंद्रियाणि पूर्वका दृष्ट्वा चिंतयन्विषयसंगं भावयन्ननुपुरुषः स्वप्नदर्शी त्रिभिर्गुणैः सत्वादिभिर्युक्तः अनु
पर्येति जाग्रदवस्थामनुसंचरति स्वप्नकोपद्रम्युत्तरादपक्रम्यते स्वशरीरेयपाकानंपरिवर्त्ततइतिस्फुरते २७ तमोपहतं तमोगुणेनाभिभूतं आम्युसंहारं आत्मानं प्रवृ
त्तिप्रकाशात्मकं संहृत्य अक्षवं नोक्षवदानं त्यहीनमुपरमं पूर्वोक्तयुगपन्द्रावस्थोछेदं करोति तत्सुखं तामसं अज्ञानप्रधानेशरीरस्य वसुषुप्तावनुभूयते ३८ सुषु

१४९

इंद्रियाण्यपि सूक्ष्माणि दृष्ट्वा पूर्वश्रुतागमान् चिंतयन्नानुपर्येति त्रिभिरेवान्वितो गुणैः २७ यत्तमोपहतं
चित्तमाप्युसंहारमक्षवं करोत्युपरमं कायेत दाहुस्तामसं बुधाः ३८ यद्यदागमसंयुक्तं न कष्टमनुशाम्यति
अथ तत्राप्युपादत्ते तमो व्यक्तमिहान्तरं ३९

प्तिसाहश्यं कैवल्यस्याहयद्यदिति यत्सुखं आगमसंयुक्तं आनंदाब्रह्मेतिवेदबोधितं यत्यस्मिन्कष्टं द्वैतदुःखं नानुपश्यति पाठांतरे यत्र न किंचित्सुखं दुःखं वा ज्ञा
ताज्ञेयं वास्ति किंतु दग्धेंधनानलवदाचार्योपदेशमनुशाम्यत्येवात्त तत्तस्मिन्नपि सुखे अव्यक्तं अन्तं तं तमउपादत्तइव वस्तुतस्तमो नास्ति तथापि द्वैतदर्शि
नाभावसाम्येन आवृतमव्यक्तं च ज्ञात्रादिविभागाभावात् ॥ ३९ ॥ राम० १४९

सर्वं सुषुप्तिवत्मोक्षेपि एषोहंकारादिघरांतो दृश्यमानः गुणः भोगापवर्गः स्वकर्मप्रत्ययः कर्महेतुकाविर्भावः प्रसंख्यातः प्रत्याख्यातः केषांचिद्विद्यावतां वज्रपंजरवद्वर्त्तते केषांचिद्विद्यावतां कालत्रयेपि न हस्ति ४० एतत एतं समाहारं संघातं क्षेत्रमाहुः एतदिति विधेयापेक्षं क्लीवत्वं मनसि संघातबीजभूते यो भावः यासत्तास क्षेत्रः सम्पुक्तिरजतवदध्यस्तस्य मनसः सत्तास्फूर्तिप्रदः ४१ एवमिति भूतेषु चतुर्विधेषु हेतुतः अनाद्यविद्याकामकर्मवशतः स्वभावात् सत्यान् तयोरात्मानात्मनोर्मिथुनीकरणात्व्यवहारे वर्त्तमानेषु सत्सु कउच्छेदः उच्छेदवान् को वा शाश्वतः स्यात् नासतो विद्यते भावो नाभावो विद्यते सत इति न्यायेनासतः संघातस्य स

एवमेष प्रसंख्यातः स्वकर्मप्रत्ययो गुणः कथंचिद्वर्त्तते सम्यक् केषांचिद्वा निवर्त्तते ४० एतदाहुः समा
हारं क्षेत्रमध्यात्मचिंतकाः स्थितो मनसि यो भावः स वै क्षेत्रज्ञ उच्यते ४१ एवं सति कउच्छेदः शाश्वतो वा
कथं भवेत् स्वभावाद्वर्त्तमानेषु सर्वभूतेषु हेतुतः ४२ यथार्णवगता नद्यो व्यक्तीर्जहति नाम च नदाश्च
तानियच्छंति तादृशः सत्वसंक्षयः ४३

रूपाभावादेव नोच्छेदप्रसंगः अत एव शाश्वतत्वं चात्यन्तेनेत्यर्थः यद्वा शाश्वत आत्मा वा कथं उच्छेदवान् भवेदिति यथापूर्वत्वया आत्मोच्छेदशंका कृता सा निराल वनेत्यर्थः एतेन पुं प्रकृत्योरत्यंतवैधर्म्यमुपपादितं ४२ यथेति नद्यो नदाश्च व्यक्तीः रूपाणि नाम च जहति त्यजंति नदाश्च ताः नदीः नियच्छंति स्ववशे कुर्वंति यथा क्षुद्रनदी महानद्यां नामरूपे जहाति महानदी च समुद्रे लीयते तद्वत्सत्वस्य महदादिघटितात्मना स्थितस्य उत्पत्तिविपरीतक्रमेण संक्षयः स्थूलं सूक्ष्मे लीयते सूक्ष्मं कारणे तच्च शुद्धे इत्यर्थः ४३ ॥

प्रतिसंयुक्तेउपाधिभिर्मिश्रेजीवेसर्वतःसर्वात्मनाद्र्पणस्यमुखवत्ग्रहणंसतिप्रेत्यभावेउपाध्यपायेसंज्ञाअयमहंदेवदत्तोस्मीतितद्ग्रहणंकुतःस्यान्नकुतश्चिदपि
ग्रहणाभावान्मुखस्येवात्मनउच्छेदोप्यस्तीतिनोक्तरंकावकाशइत्यर्थः ४४ विद्याफलमाह इमामितिवेदशास्त्रैः अन्विच्छतिशमादिपरोभवतिविसस्यमृणालस्य ४५
पाशैः स्नेहकर्मनिमित्तैः तेषांग्रहणंप्रज्ञेत्यादिना अलिंगः पंचप्राणमनोबुद्धिदशेंद्रियात्मकलिंगहीनः ४६ श्रुतिप्रमाणंतत्त्वमसिवाक्यंआगमोक्तंमंगलं

एवंसतिकुतःसंज्ञाप्रेत्यभावेपुनर्भवेत् प्रतिसंमिश्रितेजीवेग्रहणेचसर्वतः ४४ इमांचयोवेदविमो
क्षबुद्धिमात्मानमन्विच्छतिचाप्रमत्तः नलिप्यतेकर्मफलैरनिष्टैःपत्रंविसस्येवजलेनसिक्तं ४५ दृढैर्हि
पाशैर्बहुभिर्विमुक्तःप्रजानिमित्तैरपिदैवतैश्च यदाह्यसौसुखदुःखेजहातिमुक्तस्तदाग्र्यांगतिमेत्यलिं
गः ४६ श्रुतिप्रमाणागममंगलैश्चशेतेजरामृत्युभयादभीतः क्षीणेचपुण्येविगतेचपापेततोनिमि
त्तेचफलेनिविष्टे ४७ अलेपमाकाशमलिंगमेवमास्थायपश्यंतिमहत्यसक्ताः ॥ ॥ ॥

साधनंशमादिनिमित्तंमोहोस्यफलेसुखदुःखात्मके ४७ महतिबुद्धितत्त्वेऽस्मितामात्रेपश्यंति तत्रैवहिसांख्यानांगुणपुरुषांतरज्ञानंअस्माकंचप्रतीचोब्रह्म
भावावगमःप्रसिद्धःअसक्ताःविरक्ताःआकाशंहार्दाकाशंखंसगुणंब्रह्मास्थायआश्रित्यअलिंगंनिर्गुणंपश्यंतीतियोजना ४७ ४७ ४७

यथेति ऊर्णनाभिर्लूताकीटः तंतुक्षेपे तंतुमध्ये गेहे यथा तिष्ठति तथैव पात्यमानो विद्यावशो जीवः कर्मतंतुगेहे तिष्ठति। यथा चोर्णनाभस्तंतुक्षयं प्रजहाति एवं
विमुक्तोपि हानेफलमाह दुःखं विध्वंसत इति। तत्र दृष्टांतो लोष्टइति। पांसुपिंडः अ[illegible]द्रिपाषाणां ऋच्छन् वेगेन प्राप्नुवन् ४८ रुरुर्मृगभेदः ४९ पराध्यौ

यथोर्णनाभिः परिवर्त्तमानस्तंतुक्षये तिष्ठति पात्यमानः तथा विमुक्तः प्रजहाति दुःखं विध्वंसते लोष्ट इवाद्रिम
च्छन् ४८ यथा रुरुः शृंगमथो पुराणं हित्वा त्वचं वाप्युरगो यथा च विहाय गच्छत्यनवेक्षमाणस्तथा विमु
क्तो विजहाति दुःखं ४९ द्रुमं यथा वाप्युदके पतंतमुत्सृज्य पक्षी निपतत्यसक्तः तथा ह्यसौ सुखदुःखे विहा
य मुक्तः परार्ध्यां गतिमेत्यलिंगः ५० अपि च भवति मैथिलेन गीतं नगरमुपाहितमग्निनाभिवीक्ष्य न खलु मम हि द
ह्यते त्र किंचित्स्वयमिदमाह किल स्म भूमिपालः ५१ इदममृतपदं निशम्य राजा स्वयमिह पंचशिखेन भाष्यमाणं
निखिलमभिसमीक्ष्य निश्चितार्थः परमसुखी विजहार वीतशोकः ५२ इमं हि यः पठति मोक्षनिश्चयं महीपते
सततमवेक्षते तथा उपद्रवान्नानुभवत्यदुःखितः प्रमुच्यते कपिलमिवैत्य मैथिलः ५३ शांतौ मोक्षधर्मेषु पंचाशि
खवाक्यानि॥ ॥

श्रेष्ठं ५० केनवृत्तेन वृत्तज्ञो जनको मिथिलाधिप इति। युधिष्ठिरप्रश्नबीजमुपन्यस्यति। अपि चेति ५१ अवेक्षेते अर्थतः पर्यालोचयति। कपिलं कपि

किंकुर्वन्सुखमाप्नोतिकिंकुर्वन्दुःखमाप्नुयादित्यारभ्यआद्यंतंसर्वभूतानांज्ञातुमिच्छामिकौरवेत्यंतःप्राक्तनीएकादशाध्यायाउक्तवक्ष्यमाणस्वरूपज्ञानला
भार्थसाधनसंपद्विधानार्थाप्रायेणास्पष्टार्थात पापिविषमाणिपदान्यत्रव्याख्यायंते १ श्रुतिसमाधयोवेदद्रष्टारः २ दमोबाह्येंद्रियनिग्रहः तद्वर्जितःअदांतः ५

युधिष्ठिरउवाच किंकुर्वन्सुखमाप्नोतिकिंकुर्वन्दुःखमाप्नुयात् किंकुर्वन्निर्भयोलोकेसिद्धश्चरतिभारत १ भीष्म
उवाच दममेवप्रशंसंतिवृद्धाःश्रुतिसमाधयः सर्वेषामेववर्णानांब्राह्मणस्यविशेषतः २ नादांतस्यक्रियासिद्धिर्यथा
वदुपपद्यते क्रियातपश्चसत्यंचदमेसर्वंप्रतिष्ठितं ३ दमस्तेजोवर्द्धयतिपवित्रंदमउच्यते विपाप्मानिर्भयोदांतःपुरुषो
विंदतेमहत् ४ सुखंदांतःप्रस्वपितिसुखंचप्रतिबुध्यते सुखंलोकेविपर्येतिमनश्चास्यप्रसीदति ५ तेजोदमेनध्रि
यतेतन्नतीक्ष्णोधिगच्छति अमित्रांश्चबहून्नित्यंपृथगात्मनिपश्यति ६ क्रव्याद्भ्यइवभूतानामदांतेभ्यःसदाभयं
तेषांविप्रतिषेधार्थंराजासृष्टःस्वयंभुवा ७ आश्रमेषुचसर्वेषुदमएवविशिष्यते यच्चतेषुफलंधर्मेभूयोदांतेतदुच्य
ते ८ तेषांलिंगानिवक्ष्यामियेषांसमुदयोदमः अकार्पण्यमसंरंभःसंतोषःश्रद्दधानता ९ ॥ ॥ ॥

तीक्ष्णोराजसः अमित्रान्कामादीन् ६ क्रव्याद्भ्यःव्याघ्रादिभ्योमांसभक्षकेभ्यः ७ भूयोधिकं ८ लिंगानिस्वरूपाणिसदैन्यस्मादितिसमुदयोहेतुःअकार्पण्य
मदीनत्वंअसंरंभोऽभिनिवेशाभावः ९

अतिवादोलौकिककार्यभाषणं अभिमानितागर्वः १० जनवादोराजादिवार्त्तासाधुकामोमोक्षार्थीप्रत्ययेषुसुखदुःखादयनुभवेषु आपतिंउत्तरकालंनस्पृहयेतप्राप्तंसुखा
दिकंभुंजीतनतुकालांतरीयोत्कंठोहर्षविवादौचिंतनीयावित्यर्थः नापतिंप्रत्ययोनष्ठितिपाठेफलसंवादेनविश्वस्तोनृषु आदरंनकुर्यातकिंतुप्रागेवअहेतकार्येषुसा

अक्रोधश्चार्जवंनित्यंनातिवादोभिमानिता गुरुशुश्रूषानसूयाचदयाभूतेष्वपैशुनं १० जनवादमृषावादस्तुतिनिंदावि
वर्ज्जनं साधुकामस्त्वस्पृहयेन्नापतिंप्रत्ययेषुच ११ अवैरकृत्सूपचारःसमोनिंदाप्रशंसयोः सुवृत्तःशीलसंपन्नःप्रस
न्नात्मात्मवान्प्रभुः १२ प्राप्यलोकेचसत्कारांस्वर्गेवैप्रेत्यगच्छति दुर्गमंसर्वभूतानांप्रापयन्मोदतेसुखी १३ सर्वभूतहितेयुक्तोन
स्मयोद्विषतेजनं महाह्रदइवाक्षोभ्यःप्रशांतःप्रसीदति १४ अभयंयस्यभूतेभ्यःसर्वेषामभयंयतः नमस्यःसर्वभूतानांदां
तोभवतिबुद्धिमान् १५ नहृष्यतिमहत्यर्थेव्यसनेचनशोचति सवैपरिमितप्रज्ञःसदांतोद्विजउच्यते १६ कर्मभिःश्रुतसंपन्नः
सद्भिराचरितःशुचिः सदैवदमसंयुक्तस्तस्यभुंक्तेमहाफलं १७ अनसूयाक्षमाशांतिःसंतोषःप्रियवादिता सत्यंदानमनाया
सोनैषमार्गोदुरात्मनां १८

ध्रुवविश्वासोनकर्तव्यइत्यर्थः ११ सूपचारःशाठ्यवर्ज्जितादरःप्रसन्नात्माप्रसन्नचित्तः आत्मवान्धृतिमान्प्रभुर्जितकामादिदोषः १२ दुर्गमंदुःकालदुर्लभ
मन्नादिप्रापयन्दयावानित्यर्थः १३ स्मेतिदर्पयकपदं १४

मो० २० षट्चत्वारिंशः ॥ भक्तानाममयं पत्नइत्यहिंसाविधिः किंचाग्नीषोमीयं पशुमालभेत सुराग्रहं गृह्णातीति वैदिकं ब्राह्मणानां कर्मप्रवर्तनावाक्यं तथा प्रीणायेच्छ्वडिकांम त्तृपानां सेनसु
१५२ रपानं पेयं वैदिकं ब्राह्मणानां ॥ सविधिः किमेताभ्यां विरुध्यतेन न वेति प्रश्नार्थः द्विजातयः स्त्रैवर्णिकाः व्रतं पर सदीक्षां मत्रदीक्षा च तद्युक्ताः हविः देवताशेषं अन्नं अदनीयं मांसम
ध्वादि ॥ ब्राह्मणानां पूर्वोक्तं द्विविधं तत्रोक्तौ यं रं कामः स्वर्गपुत्रादिस्तस्मै यत्र भुंजते तदिदं कथं युक्तमयुक्तं वेति पदार्थः १ अवेदोक्तेति ॥ भुंजानात्र भोज्यं मांसादि इति शे ३

152

कामक्रोधौ च लोभश्च परस्येर्ष्या विकत्थना कामक्रोधौ वशे कृत्वा ब्रह्मचारी जितेंद्रियः १९ विक्रमन्घोरे तमसि ब्राह्मणाः संशित
व्रतः कालाकांक्षी चरेल्लोकान्निरपाय इवात्मवान् २० शांतो मोक्षधर्मेषु दांताध्यायः युधिष्ठिर उवाच द्विजातयो व्रतोपे
तायदिदं भुंजते हविः अन्नं ब्राह्मणाः कामात्कथं तत्पितामह १ भीष्म उवाच अवेदोक्तव्रतोपेता भुंजानाः कार्यका
रिणः वेदोक्तेषु च भुंजाना व्रतलुप्ता युधिष्ठिर २ युधिष्ठिर उवाच यदिदं तप इत्याहुरुपवासं पृथग्जनाः एतत्तपो म
हाराज उताहो किं तपो भवेत् ३

षः कार्यकारिणः कामचारवंतः इहैव पतितत्वाद्व्यर्था इत्यर्थः व्रतलुप्ताः दीक्षोक्तफलानुरागिणः स्वर्गं प्राप्य पतिष्यंतीत्यर्थः लुप्ता इति पाठे व्रतविघ्निनावंचिता इत्यर्थः २
एवं परपीडाकरं यागादिकं विनिंद्य देहपीडाकरमपि धर्मं मुमुक्षूणामनुपादेयं निंदति प्रश्नोत्तराभ्यां यदिति ३ ३ शम०
१५२

अत्मतंत्रं आत्मविघातस्यात् उपघातोविघ्नः ४ आत्मविघोपकारकंतपआहत्यागइति भृतमयंकरकर्मसन्यासस्त्यागः सन्नतिः भृत्ताराधनं असन्यासिनामपिग्र
र्भनाहसदेतिसकुटुंबिकोपिसदोपवासीइत्यादिविशेषणवान्भवेत् ५ कर्मकामः नतुफलकामः अस्वप्नइतिच्छेदः ७ अतिथिप्रियैर्भुवदेवातेप्राग्नः देवताश्चद्विजाः

भीष्मउवाच मासपक्षोपवासेनमन्यंतेयत्तपोजनाः आत्मतंत्रोपघातस्तु नतपस्तत्सतांमतं ४ त्यागश्चसन्नतिश्चैव शिष्यतेतपउत्त
मं सदोपवासीसभवेद्ब्रह्मचारीसदाभवेत् ५ मुनिश्चस्यात्सदाविप्रोदेवतंचसदाभवेत् कुटुंबिकोधर्मकामः सदास्वप्नश्चभारत ६ अ
मांसादीसदाचस्यात्पवित्रश्चसदाभवेत् अमृताशीसदाचस्याद्देवतातिथिपूजकः ७ विघसाशीसदाचस्यात्सदाचैवातिथिव्रतः
श्रद्दधानःसदाचस्याद्देवतद्विजपूजकः ८ युधिष्ठिरउवाच कथंसदोपवासीस्याद्ब्रह्मचारीकथंभवेत् विघसाशीकथंचस्यात्स
दाचैवातिथिव्रतः ९ भीष्मउवाच अंतराप्रातराशंचसायमाशंतथैवच सदोपवासीसभवेद्योनभुंक्तेंतरापुनः १० भार्यांगच्छन्ब्र
ह्मचारीऋतौभवतिवैद्विजः ऋतवादीभवेन्नित्यंज्ञाननित्यश्चयोनरः ११ नभक्षयेद्वृथामांसममांसाशीभवत्यपि ॥ दाननित्यः
पवित्रश्चअस्वप्नश्चदिवास्वपन् १२ भृत्यातिथिषुयोभुंक्तेभुक्तवत्सुसदासदा अमृतंकेवलंभुंक्तेइतिविद्धियुधिष्ठिर १३

नांप्रजकः ११ वृथादेवपितृशेषंविना अस्वपन्निति छेदः १२ ॥ ॥ ॥ ॥ ॥ ॥

अभुक्तवत्सु अतिथ्यादिषु नाश्नातः अनश्नन् १७ सप्तचत्वारिंशः ॥ ॥ यदिति इदं सदोपवासी सत्यादिनेत्यादिना विहितं कर्म तस्य कर्ता अस्ति अस्तिर्भवत्यर्थे पुरुषस्तस्य कर्ता भव
तिनेवेति प्रश्नार्थः कर्त्तेति काणादाः अकर्त्तेति कापिलाः आद्यमोक्षानुपपत्तिः स्वाभाविकस्य कर्तृत्वस्य वन्हेरौष्ण्यवदात्मपनाशमंतरेणाविनाशात् अंते शास्त्रानर्थक्यापत्तिः

अभुक्तवत्सु नाश्नानः सततं यस्तु वै द्विजः अभोजनेन तेनास्य जितः स्वर्गो भवत्युत १४ देवताभ्यः पितृभ्यश्च भृत्येभ्योऽतिथिभिः सह
अवशिष्टं तु योऽश्नाति तमाहुर्विघसाशिनं १५ तेषां लोका ह्यपर्यंताः सदने ब्रह्मणा सह उपस्थिता ह्यप्सरोभिः परियांति दिवौकसः
१६ देवताभिश्च ये सार्द्धं पितृभिश्चोपभुंजते रमंते पुत्रपौत्रैश्च तेषां गतिरनुत्तमा १७ शांतौ मोक्षधर्मेषु अमृतप्राश्निकोनाम ॥ ॥
युधिष्ठिर उवाच यदिदं कर्म लोकेस्मिन् शुभं वा यदि वाऽशुभं पुरुषं योजयत्येव फलयोगेन भारत १ कर्त्ता स्वित्तस्य पुरुष उताहो
नेति संशयः एतदिच्छामि तत्त्वेन तत्त्वतः श्रोतुं पितामह २ भीष्म उवाच अत्राप्युदाहरंतीममितिहासं पुरातनं प्रह्लादस्य च सं
वादमिंद्रस्य च युधिष्ठिर ३ असक्तं धूतपाप्मानं कुले जातं बहुश्रुतं अस्तब्धमनहंकारं सत्वस्थं समये रतं ४ ॥ ॥ ॥

त्तिः जडस्यार्थ्ययत्वात् चेतनस्याकर्तृत्वाच्च संशयः ३ तत्त्वविदां लक्षणमेव ज्ञानसाधनमिति प्रह्लादं विशिनष्टि असक्तमित्यादिना असक्तं फलेच्छारहितं अस्तब्धं अ
नम्रं अनहंकारं वीतरागं सत्वस्थं सात्विकं अतएव समये स्वोचितशमादौ धर्मे रतं ४

विदितः प्रभवश्चाप्ययश्चेत्परिणाम्युपादानभूतः परमात्मा येन तं ६ आत्मनि प्रतीचि श्रेयः पश्यसि आनंदरूपे ज्ञाने चिन्मात्रे धीरं कृतकांतिमभिभूतं अतएव निश्चितनिश्च
यं परः हिरण्यगर्भः अवरो नीचो यस्मात् ईश्वरात् तज्ज्ञो अतएव सर्वज्ञे आत्मनो वा अरे दर्शनेनेदं सर्वं विदितमित्यात्मज्ञानात्सार्वज्ञ्यश्रुतेः समं निर्विशेषं तद्दर्शनवंतं

तुल्यनिंदास्तुतिं दांतं शून्यागारनिवेशनं चराचराणां भूतानां विदितप्रभवाप्ययं ५ अक्रुध्यंतमहृष्यंतमप्रियेषु प्रियेषु च कांचनेवाथलो
ष्टेवाउभयोः समदर्शनं ६ आत्मनिश्रेयसिज्ञानेधीरंनिश्चितनिश्चयं परावरज्ञंभूतानांसर्वज्ञंसमदर्शनं ७ शक्रः प्रह्लादमासीनमेकां
तेसंयतेंद्रियं बुभुत्समानस्तत्प्रज्ञामभिगम्येदमब्रवीत् ८ यैः कश्चित्संमतोलोकेगुणैः स्यात्पुरुषोनृप भवत्यनपगान्सर्वांस्तान्गु
णान्लक्षयामहे ९ अथतेलक्ष्यतेबुद्धिःसमाबालजनैरिह आत्मानंमन्यमानःसन्श्रेयःकिमिहमन्यसे १० बद्धःपाशैश्च्युतः
स्थानाद्द्विषतांवशमागतः श्रियाविहीनःप्रह्लादशोचितव्येनशोचसि ११ प्रज्ञालाभात्तुदैतेयउताहोधृतिमत्तया प्रह्लादस्वस्थरू
पोसिपश्यन्व्यसनमात्मनः १२ इतिसंचोदितस्तेनधीरोनिश्चितनिश्चयः उवाचश्लक्ष्णयावाचास्वांप्रज्ञामनुवर्णयन् १३ ॥

७ बुभुत्समानः संवेदितुमिच्छन् ८ भवति त्वयि अनपगान् स्थिरान् ९ बालजनैः समा रागद्वेषादिराहित्यात् आत्मानं मन्यमानः जानन् आत्मज्ञानादपि किं श्रेयः प्रशस्ततरं साधनं

१२ १३

मो० अथ सांख्यमतमादाय कर्तृत्वं निराकरोति प्रवृत्तिमित्यादिना प्रवर्त्तत इति प्रवृत्तिः निवर्त्तत इति निवृत्तिः पुरुषस्य भोगाय वर्गौ साधयितुमनुलोमप्रतिलोमपरिणामव
१५४ तीं मूलप्रकृतिः तां कर्तृकरणक्रियारूपां आत्मनोन्यायेनावबुध्यते तस्मात्स्वनिबुद्धिधर्मान्कर्तृत्वादीनारोपयति स संभ्रम एव तन्न तु आत्मानं अनुपश्यतः तथा च श्रुतिः तत्र को
मोहः कः शोक एकत्वमनुपश्यत इति १७ रथादिवदचेतना प्रकृतिरधिष्ठातारं विना कथं प्रवर्त्तेतेत्याशंक्याह स्वभावादिति यथा वत्सानन्तरं प्रागेव तद्वृद्धिनिमित्तं क्षीरं रुधिरपूरो
154 पि गवामधस्मि प्रवर्त्तते न च तदा वात्सल्यादिकं तत्प्रवर्त्तकमस्ति वत्सस्यैवाजातत्वात् जाते तु वत्से वात्सल्यं त्वरयतां नाम प्रवृत्तिमाक्षीरे स्वाभाविक्येव तद्वत्सर्वे भावा भावाः स्वभावादेव

प्रह्लाद उवाच प्रवृत्तिं च निवृत्तिं च भूतानां यो न बुध्यते तस्य स्तंभो भवेद्बाल्यान्नास्ति स्तंभोनुपश्यतः
स्वभावात्संप्रवर्त्तंते निवर्त्तंते तथैव च सर्वे भावास्तथाभावाः पुरुषार्थो न विद्यते १५ ॥ ॥

प्रकृतिस्तत एव संप्रवर्त्तते नास्ति प्रवर्त्तकापेक्षेत्यर्थः नन्वेवं सिद्धांते सांख्यैरिष्टाशंकाया पुरुषार्थो भोगापवर्गात्मकः पुरुषार्थो न विद्यत इति न हि प्रकृतिः कर्त्री पुरुषो भोक्तेति वदा
मः येन सिद्धांतहानिः स्यात् शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वादिति न्यायं च पश्येम किंतु या कर्त्री सैव भोक्त्री आत्मनि तु भोक्तृत्वं जलचंद्रचाचल्यवदारोपितमिति वदामः १५ रा० १५४

नन्वयस्कांतमणिवत् पुरुषस्य उदासीनस्यापि सत्तामात्रेण प्रवर्त्तकत्वमस्त्वित्याशंक्याह पुरुषार्थस्येति भोगापवर्गयोरभावे कारकः कारयिता कथं स्यात् सत्तामात्रेणाकार
यितृत्वमपि विक्रियमाणसत्वाधीनं विक्रिया चन रज्जुरगायमाणायाः प्रकृतेर्वास्तवी संभवतीति नु कारकत्वं आत्मनः तत एवन कुर्वतः अकुर्वतस्तस्य इह देहादौ स्वपंमा
नम् अहमित्यभिमानो भवेत् अविद्ययेति शेषः १६ कस्तावत्ता दोष इत्यत आह इति आत्मनः कर्त्तृत्वे दृष्टविरोधमाह यदीत्यादिना १८ नन्वदृष्टानुकूल्याभावादारंभविघा

पुरुषार्थस्य चाभावेनास्ति कश्चिच्च कारकः स्वपंनकुर्वतस्तस्य जातु मानो भवेदिह १६ यस्तु कर्त्तारमात्मानं मन्यते साध्वसा
ध्वुवा तस्य दोषवती प्रज्ञा अतत्वज्ञेति मे मतिः १७ यदि स्यात्पुरुषः कर्त्ता शक्रात्मश्रेय एव ध्रुवं आरंभात्तस्य सिद्ध्येयुर्नतु जात्वपरा
भवत् १८ अनिष्टस्य हि निर्वृत्तिरनिर्वृत्तिः प्रियस्य च लक्ष्यते यतमानानां पुरुषार्थस्ततः कुतः १९ अनिष्टस्याभिनिर्वृत्तिमि
ष्टसंवृत्तिमेव च अप्रयत्नेन पश्यामः केषांचित्तत्स्वभावतः २० प्रतिरूपतराः केचिद्दृश्यंते बुद्धिमत्तराः विरूपेभ्योल्पबुद्धिभ्यो
लिप्समानाधनागमं २१

तइत्यत आह अनिष्टस्येति हितार्थं यतमानानां स्वतंत्राणामप्यनिष्टादृष्टोपलब्धिरप्ययुक्तैवेति भोक्तृत्वसमानियतस्य कर्त्तृत्वस्याभावे भोक्तृत्वस्याप्यभाव इत्यर्थः १९
ईशः कालश्चेति स्वभावस्यैव नामांतरमित्यभिप्रेत्याह अनिष्टस्येति यथानिष्टनिष्पत्तिरिष्टनिरोधानं चायत्नतएव स्वभावादापततित एवमन्यदपीत्यर्थः नहि स्वभावज्ञमदृष्टं
स्वभावप्रवर्त्तकं भवति कार्यस्य कारणाप्रवर्त्तकत्वादिति भावः २१

प्रकृतेः स्वातंत्र्यमुपसंहरति द्वाभ्यां स्वभावेति गुणाः सुखदुःखाद्[illegible]यः मानकारणं अहं सुखी कर्त्ता भोक्ता विश्वमभिमानहेतुर्न किमपीत्यर्थः २२ आत्मप्रतिष्ठा मोक्षः मुक्ता
आत्मज्ञानं तदपि स्वभावादेव बंधस्यैवासत्वान्न त्वप्रतियोगिनी मुक्तिरपि च अज्ञानादेवेत्यर्थः तथा च श्रुतिः न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्ये
षा परमार्थतेति २३ ननु पद्मिन्यवदेशकाल[illegible]स्थानीया प्रकृतिः साधारणं कर्म तु बीजवदसाधारणमिति शंकते कर्मजामिति । एतन्निरासं प्रतिजानीते कर्मणामिति ।
विषयं विशेषकार्यं २४ तदेवाह यथेति का कोन्त्वमिव कर्माणि स्वभावं प्रकाशयंति न तु वर्त्तयंतीत्यर्थः । लक्षणं ज्ञापकानि । असाधारणो धर्म इति यावत् अयंभावः

स्वभावप्रेरिताः सर्वे निविशंते गुणा यदा शुभाशुभास्तदा तत्र कस्य किं मानकारणं २२ स्वभावादेव तत्सर्वमिति मे निश्चिता
मतिः आत्मप्रतिष्ठा प्रज्ञा वा मम नास्ति ततोन्यथा २३ कर्मजं त्विह मन्यंते फलयोगं शुभाशुभं कर्मणां विषयं कृत्स्नमहं वक्ष्या
मि तत्त्वतः २४ यथा वेदयते कश्चिदोदनं वायसो ह्यदन् एवं सर्वाणि कर्माणि स्वभावस्यैव लक्षणं २५ ॥ ॥ ॥

तंतव एव पटस्य कारणं तत्कृतशौक्ल्यादिकं तु पटगतं वैचित्र्यस्य एवं स्वभाव एव जन्ममात्रहेतुः तत्कृतं धर्मादिकं तद्वैचित्र्ये ऽसाधारणो हेतुः एतदेवोक्तं योगैः निमि
त्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवदिति । धर्मादिर्गुणानां न प्रवर्त्तकः किंतु तेन गुणप्रवाहस्याधर्मस्त्रोतः खिलीकुर्वता धर्मस्त्रोतसस्त्वावरणं दूरीक्रि
यते इति सूत्रार्थः एतदेव कर्मणां स्वभावज्ञापकत्वमिति २५

फलितमाह विकारानिति विकारान्धर्माधर्मान्परांप्रकृतिं अर्वाचीनत्रिगुणात्मकप्रकृत्यपेक्षया श्रेष्ठांप्रकृतिमुपादानंब्रह्मयो न वेद तस्यकर्मप्रधानस्यभेददर्शिनः स्तंभोभव
तिनतु अत्र तु पश्यतः परांप्रकृतिं २६ ब्रह्मविदः कुतस्तंभोनास्तीत्याशंक्य प्रकृतिरेवकर्त्री नत्वात्मेति बोधादित्याह स्वभावेति कर्तृत्वाभिमानो हि दर्पादेः कारणं तदभावा
द्दर्पाद्यभाव इत्यर्थः २७ यस्मात्त्वं वेदज्ञानामि सर्वं मंतव्यदितितस्मान्नशोचामीत्यर्थः २८ शोकाभावे हेतुर्नाहनिर्ममइतिमुक्तबंधनः निर्वासनः। स्वस्थः स्वरूपप्रतिष्ठः

विकारानेव योवेद नवेद प्रकृतिंपरां तस्यस्तंभोभवेद्बाल्यान्नास्तिस्तंभोनुपश्यतः २६ स्वभावभाविनोभावान्सर्वानेवेहनिश्च
यात् बुध्यमानस्य दर्पोवामानोवा किंकरिष्यति २७ वेदधर्मविधिंकृत्स्नंभूतानांचाप्यनित्यतां तस्माच्छुकनशोचामि सर्वंह्येववेद
मंतवत् २८ निर्ममोनिरहंकारोनिराशीर्मुक्तबंधनः स्वस्थोव्यपेतः पश्यामि भूतानांप्रभवाप्ययौ २९ कृतप्रज्ञस्यदांतस्यवि
तृष्णस्यनिराशिषः नायासोविद्यतेशक्रपश्यतोलोकमव्ययं ३० प्रकृतौचविकारेचनमेप्रीतिर्नचद्विषे द्वेष्टारंचनपश्यामियो
मामद्यममायते ३१

अव्यपेतः देहाद्यनभिमानेनस्वरूपादप्रच्युतः भूतानांप्रभवाप्ययौपरंब्रह्म २९ लोकंआत्मानंअव्ययंनिरपायं ३० प्रकृतौविष्वक्अविकारेधर्माधर्मप्रलयोः ममदे
ष्टारमहंनपश्यामि यस्ममापतेममेव आचरति पुत्रमित्रादिरात्मीयस्तंनपश्यामि ३१

मो० ऊर्ध्वंस्वर्गंअवाक्पातालंतिर्यक्मर्त्यलोकंचनकामयेक्वचित्काले। तत्रहेतुर्नहीति ज्ञेयेविज्ञानेकर्मणिमतेरेशर्मवानविघ्नतेइतिनहिकिंतुज्ञानेएवनविघ्नतइति योजनाविज्ञानेबुद्धौ
१५६ ज्ञानेचिदात्मनि। आत्मनोधर्माधर्मतत्फलाप्रप्त्यभावादहंनकिमपिकामयेइत्यर्थः ३३ प्रज्ञाज्ञानंशांतिस्तत्फलं प्रसादेनबुद्धेर्नैर्मल्येन। आत्मवत्तयाजितेंद्रियतया।

156

नोर्ध्वंनावाङ्नतिर्यक्चनक्वचिच्छक्रकामये नहिज्ञेयेनविज्ञानेनज्ञानेकर्मविद्यते ३२ शक्रउवाच येनैषालभ्यतेप्रज्ञायेनशांतिरवाप्यते प्रब्रूहितमुपायंमेसम्यक्प्रह्लादपृच्छतः ३३ प्रह्लादउवाच आर्जवेनाप्रमादेनप्रसादेनात्मवत्तया वृद्धशुश्रूषयाशक्र पुरुषोलभतेमहत् ३४ स्वभावाल्लभतेप्रज्ञांशांतिमेतिस्वभावतः स्वभावादेवतत्सर्वंयत्किंचिदनुपश्यसि ३५ इत्युक्तोदैत्यपतिनाशक्रोविस्मयमागमत् प्रीतिमांश्चतदाराजंस्तद्वाक्यंप्रत्यपूजयत् ३६ सतदाभ्यर्च्यदैत्येंद्रंत्रैलोक्यपतिरीश्वरः असुरेंद्रमुपामंत्र्य जगामस्वंनिवेशनं ३७ शांतौमोक्षधर्मेषुशक्रप्रह्लादसंवादः ॥ ॥

महत्मोक्षं ३४ अनात्मनःकर्तृत्वमुपपाद्योपसंहरतिस्वभावादेवेतिविद्यामुक्तिश्चमापिकेवेत्यर्थः यथोक्तं श्रीमद्भागवतेविद्याविद्येममतनूविद्ध्युद्धवशरीरिणांमोक्षबंधकरी राम०
आद्येमाययामेविनिर्मितेइति। ममनायाविनः ३७ अष्टचत्वारिंशः॥ १५६

इंद्रियनिग्रहोहंकर्तृत्वाभिमानत्यागश्चकार्यइत्यध्यायद्वयेनोक्तंसंपदंचांचल्यात्तत्प्राप्तिनाशयोर्हर्षशोकौनकर्तव्याविस्तारव्यापिकानुखेनाध्यायत्रयेणाहयथावुध्ये

युधिष्ठिरउवाच यथावुध्यामहीपालोभ्रष्टश्रीर्विचरेन्महीं कालदंडविनिष्पिष्टस्तन्मेब्रूहिपितामह १ भीष्मउवाच अत्राप्युदाह
रंतीममितिहासंपुरातनं वासवस्यचसंवादंवलेर्वैरोचनस्यच २ पितामहमुपागम्यप्रणिपत्यकृतांजलिः सर्वानेवासुरान्जित्वावलिं
पप्रच्छवासवः ३ यस्यस्मददतोवित्तंनकदाचनहीयते तंवलिंनाधिगच्छामिब्रह्मन्नाचक्ष्वमेवलिं सवायुर्वरुणश्चैवसरविःसचचं
द्रमाः सोग्निस्तपतिभूतानिजलंचसभवत्युत ५ तंवलिंनाधिगच्छामिब्रह्मन्नाचक्ष्वमेवलिं सएवह्यस्तमयतेसःस्मविद्योततेदिशः
६ सवर्षतिस्मवर्षाणियथाकालमतंद्रितः तंवलिंनाधिगच्छामिब्रह्मन्नाचक्ष्वमेवलिं ७ ब्रह्मोवाच नैतत्तेसाधुमघवन्यदेनमनुपृच्छ
सि पृष्टस्तुनानृतंब्रूयात्तस्माद्वक्ष्यामितेवलिं ८ उष्ट्रेषुयदिवागोषुखरेष्वश्वेषुवापुनः वरिष्ठोभविताजंतुःशून्यागारेशचीपते
९ शक्रउवाच यदिस्मवलिनाब्रह्मन्शून्यागारेसमेयिवान् हन्यामेनंनवाहन्यांतद्ब्रह्मन्ननुशाधिमां १० ब्रह्मोवाच मास्म
शक्रवलिंहिंसीर्नत्वंवलिर्वधमर्हति न्यायस्तुशक्रप्रष्टव्यस्त्वयावासवकामया ११ भीष्मउवाच एवमुक्तोभगवतामहेंद्रःपृ
थिवींतदा चचारैरावतस्कंधमधिरुह्यश्रियावृतः १२

त्यादिनाकालदंडविनिष्पिष्टोविपद्ग्रस्तः २ स्ववीर्यख्यापनायवलिंस्तौतियस्येत्यादिना ८ गोषुवृषभेषु १० ११ १२ ॥ छ छ ॥ ॥

अकृष्टपच्याकर्षणांविनाधान्यप्रसूः २३ यदाचैताःसूक्ष्माग्रःस्थूलमूलःषट्त्रिंशदंगुलोदंडः शम्यासावलवताक्षिप्तायावद्दूरेपतेत्तावद्वेदिकंदेवयजनंएवंसर्वापिपृथ्वि

ततोददर्शसवलिंखरवेषेणसंवृतं यथाख्यातंभगवताशून्यागारकृतालयं १३ शक्रउवाच खरयोनिमनुप्राप्तस्तुषभक्षोसिदानव
इयंतेयोनिरधमाशोचस्याहोनशोचसि १४ अदृष्टंवततपश्यामिद्विषतांवशमागतं श्रियाविहीनंमित्रैश्चभ्रष्टवीर्यपराक्रमं १५ यत्तद्या
नसहस्रैस्त्वंज्ञातिभिःपरिवारितः लोकान्प्रतापयन्सर्वान्यास्यस्मानवितर्कयन् १६ त्वन्मुखाश्चैवदैतेयाव्यतिष्ठंस्तवशासने अकृष्टप
च्याचमहीतैवैश्वर्येयवभूवह १७ इदंचतेघव्यसनंशोचस्याहोनशोचसि यदातिष्ठः समुद्रस्यपूर्वकूलेविलेलिहन् १८ ज्ञातीन्विभ
जतोवित्तंतदासीत्तेमनःकथं यत्तेसहस्रसमिताननृतुर्दैवयोषितः १९ बहूनिवर्षपूगानिविहारेदीप्यतःश्रिया सर्वाःपुष्करमालि
न्यःसर्वाःकांचनसप्रभाः २० कथमद्यतदाचैवमनस्तेदानवेश्वर छत्रंतेवासीत्सुमहत्सौवर्णंरत्नभूषितं २१ ननृतुस्तत्रगंधर्वाःषट्
सहस्राणिसप्तधा यूपस्तवासीत्सुमहान्यजतस्सर्वकांचनः २२ यत्रादद्दःसहस्राणिअयुतानांगवांदश अनंतरंसहस्रेणतदासी
द्दैत्यकामतिः २३ यदाचपृथिवींसर्वांयजमानोनुपर्यगाः शम्याक्षेपेणविधिनातदासीत्किंनुतेहृदि २४ ॥ ॥

वीशम्याप्रक्षेपविमितातवदेवयजनानामपर्याप्ताभूदित्यर्थः पर्यगाः परिहृत्यगतवान् २४ २४ ॥ ॥ ॥ ॥ ॥

भंगारः कनकालुकारव्यः सौवर्णाउदपात्रविशेषः २६ गुहायांमूलप्रकृतौनिहितानि ३० ऊनंपंचाशत्तमःप्रयाहारायप्रकृस्तोक्तये ७ ५ ॥ ॥ ॥

नतेपश्यामिभंगारंनछत्रंव्यजनेनच ब्रह्मदत्तांचतेमालांनपश्याम्यसुराधिप २५ बलिरुवाच नत्वंपश्यसिभंगारंनछत्रंव्यजने
नच ब्रह्मदत्तांचमेमालांनत्वंद्रक्ष्यसिवासव २६ गुहायांनिहितानित्वंममरत्नानिपृछसि यदामेभविताकालस्तदात्वंतानिद्रक्ष्य
सि २७ नत्वेतदनुरूपंतेयशसोवाकुलस्यवा समृद्धार्थोसमृद्धार्थंयन्मांकत्थितुमिछसि २८ नहिदुःखेषुशोचंतेनप्रहृष्यं
तिचर्द्धिषु कृतप्रज्ञाज्ञानतृप्ताःक्षांताःसंतोमनीषिणः २९ त्वंतुप्राकृतयाबुध्यापुरंदरविकत्थसे यदाहमिवभावीस्यास्तदा
नैवंवदिष्यसि ३० शांतौमोक्षधर्मेषुबलिवासवसंवादे॥ ॥भीष्मउवाच पुनरेवतुतंशक्रःप्रहसन्निदमब्रवीत् निःश्वसंतंय
थानागंप्रव्याहारायभारत १ शक्रउवाच यत्तद्यानसहस्रेणज्ञातिभिःपरिवारितः लोकान्प्रतापयन्सर्वान्यास्यस्मानवित
र्कयन् २ दृष्ट्वासुलूपणांचेमामवस्थामात्मनोबले ज्ञातिमित्रपरित्यक्तःशोचस्याहोनशोचसि ३ प्रीतिंप्राप्यातुलांपूर्वंलो
कांश्चात्मवशेस्थितान् विनिपातमिमंवाह्यंशोचस्याहोनशोचसि ४ बलिरुवाच अनित्यमुपलक्ष्येहंकालपर्यायधर्मतः त
स्माछक्रनशोचामिसर्वंह्येवेदमंतवत् ५

इदंरवशत्वंनापराधादपितुकालपर्यायादित्यर्थः ६ जीवितंजीवत्वनेनेतिलिंगंशरीरंस्थूलंजातास्वभावेनादेहाः स्थूलसूक्ष्मभेदेनद्विविधाः तत्राज्ञलापुकान्यायेन
मरणेपिलिंगस्यस्थूलदेहांतरसंगतेरपरिहतत्वात्। स्थूलवल्लिंगमप्युत्पन्नेनाप्याप्यते। अन्नमयंहिसोम्यमनआपोमयः प्राणास्तेजोमयीवागितिश्रुतेः विनश्यतः मो
क्षेत्र्ययमर्थः स्थूलसूक्ष्मदेहधर्मैर्गर्दभत्वाशनयादिमत्वप्रभृतिभिर्दर्पदृष्टाहंततोविविक्तमात्मानंजानन्नव्याकुलीभवामीत्यर्थः ७ एतदेवाहनहीतिईदृशंभावंग

-158

अंतवंतइमेदेहाभूतानांचसुराधिप तेनशकानशोचामिनापराधादिदंमम ६ जीवितंचशरीरंचजात्यैवसहजायते उभेसहविवर्द्धे
तेउभेसहविनश्यतः ७ नहीदृशमहंभावमवशःप्राप्यकेवलं यदेवमभिजानामिकाव्यथामेविजानतः ८ भूतानांनिधनंनि
ष्ठास्रोतसामिवसागरः नैतत्सम्यग्विजानंतोनरामुह्यंतिवज्रधृक् ९ येत्वेवंनाभिजानंतिरज्ञोमोहपरायणाः तेकृच्छ्रंप्राप्यसीदंतिवु
द्धिर्येषांप्रणश्यति १० बुद्धिलाभात्तुपुरुषःसर्वंनुदतिकिल्बिषं विपाप्मालभतेसत्वंसत्वस्थःसंप्रसीदति ११ ततस्तुयेनिवर्त्तंतेजा
यंतेवापुनःपुनः कृपणाःपरितप्यंतेतैरर्थैरभिचोदिताः १२ १२

गौं

ईदृशंदेहंप्राप्याहंविवशोदेहधर्मैःपराभूतोनह्यस्मीतियोजना। एवंआत्मनोऽसंगत्वं ८ भूतानांस्थूलसूक्ष्माणांनिधनंमरणंनिष्ठापरागतिःनत्वात्मनः नमुह्यंतीति
संबंधः ९ मूढोनश्यतिअन्नत्वमत्र तीत्याहद्वाभ्यांयेत्विति १० सत्वस्थःबुद्धिमान्संप्रसीदतिमोहजंकालुष्यंत्यजति ११ ततस्तत्वान्निवर्त्तंतेरजस्तमोभ्यामभिभू रामः०
यंतइत्यर्थः अर्थैःकामादिभिः १२

स्वसमत्वैलक्षण्यमाह। अर्थेति १३ अत्र युक्तिमाह हतमिति हतं निर्जीवं देहं हंति न तु जीवं एतेन देहस्यात्मत्वं निरस्तं यो हंति देहादन्योहं हंतेत्यभिमानी कर्ता सोपि
हत एव दृश्यत्वाद्देहवदात्मत्वेनमतो यमानोपि जड एव उभौ यो हंति बुध्यात्मवादी यो हतो देहात्मवादी १४ हंतीति हत्वा जयतीति जित्वा उभयत्राप्यन्येभ्योपि दृ
श्यंत इति क्त्विनिष्ठतुगागमः। आद्येनुनासिकलोपोधिकः हंता जेता च पुरुषाधमः धीतादात्म्यापन्नः कर्तृत्वाभिमानी पुरुषाभासः न तु मुख्यः पुरुषः स हि त्वकर्तैवायो

अर्थसिद्धिमनर्थं च जीवितं मरणं तथा सुखदुःखफलं चैव न द्वेष्मि न च कामये १३ हतं हंति हतो ह्येव यो नरो हंति कंचन उभौ तौ न वि
जानीतो यश्च हंति हतश्च यः १४ हत्वा जित्वा च मघवन् यः कश्चित्पुरुषायते अकर्ता ह्येव भवति कर्ता ह्येव करोति तत् १५ को हि
लोकस्य कुरुते विनाशप्रभवावुभौ कृतं हि तत्कृतेनैव कर्ता तस्यापि चापरः १६ पृथिवी ज्योतिराकाशमापो वायुश्च पंचमः एतद्योनी
नि भूतानि तत्र का परिदेवना १७ महाविद्योल्पविद्यश्च बलवान्दुर्बलश्च यः॥ दर्शनीयो विरूपश्च सुभगो दुर्भगश्च यः १८

हि कर्ता धीधातुः स एव करोति तत्तद्धननादिकं १५ जगत्कर्तृत्वमपि पुरुषे नास्तीत्याह कोहीति तत्तल्लोकप्रपंचं कृतेति निजमसत्ता मन साज्ञाकृता तस्य मनसोपि कर्ता
परः १६ तमेवाह पृथिवीति मनोपि पांचभौतिकमित्यर्थः भूतानि स्थूलसूक्ष्मशरीराणि १७ महाविद्य इति विद्यावत्त्वबलवत्त्वादयो मनोदेहयोर्भौतिकयोर्वि
काराः दधिक्षीरादिवत्कालैकनिर्वर्त्याः न त्वात्मसंबंधिन इति जानतो मम न व्यथास्तीति श्लोकद्वयार्थः तस्मिन् देहविकारे पूर्वोक्ते १८ ॥ ॥ ॥

दग्धं कालात्मना ईश्वरेण अनुदहति वह्न्यादिः मया हतास्त्वं जहि मा व्यथिष्ठा इत्यादि स्मृतेः एवमग्रेपि १९ अस्य कालस्य विधेर्विधातुः दिव्यस्य पुराणपापे

सर्वकालः समादत्ते गंभीरः स्वेन तेजसा तस्मिन्कालवशं प्राप्ते कात्र्यथा मे विजानतः १९ दग्धमेवानुदहति हतमेवानुहन्य
ते नश्यते नष्टमेवाग्रे लब्धव्यं लभते नरः २० नास्य द्वीपः कुतः पारो नावारः संप्रदृश्यते नांतमस्य प्रपश्यामि विधेर्दिव्यस्य चि
तयन् २१ यदि मे पश्यतः कालो भूतानि न विनाशयेत् स्यान्मे हर्षश्च दर्पश्च क्रोधश्चैव शचीपते २२ तुषभक्षं तु मां ज्ञात्वा
प्रविविक्तजने गृहे विभ्रतं गार्दभं रूपमागत्य परिगर्हसे २३ इच्छन्नहं विकुर्यां हि रूपाणि बहुधात्मनः विभीषणानि यानीक्ष्य पला
येथास्त्वमेव मे २४ कालः सर्वं समादत्ते कालः सर्वं प्रयच्छति कालेन विहितं सर्वं मा कृथाः शक्र पौरुषं २५ पुरा सर्वं प्रव्यथि
तं मयि क्रुद्धे पुरंदर अवैमि त्वस्य लोकस्य धर्मं शक्र सनातनं २६ त्वमप्येवमवेक्षस्व मात्मना विस्मयं गमः प्रभवश्च प्रभावश्च नात्म
संस्थः कदाचन २७ कौमारमेव ते चित्तं तथैवाद्य यथा पुरा समवेक्षस्व मघवन्बुद्धिं विंदस्व नैष्ठिकीं २८ देवा मनुष्याः पितरो गं
धर्वोरगराक्षसाः आसन्सर्वे मम वशे तत्सर्वं वेत्थ वासव २९ नमस्तस्यै दिशेप्यस्तु यस्यां वैरोचनो बलिः इति मामभ्यपद्यंत बुद्धि
मात्सर्यमोहिताः ३०

तरस्या २३ ईप्सद्दृष्ट्वा २४ धर्मं वृद्धिक्रमसवत्वं २६ प्रभवे ऐश्वर्यं प्रभावस्तदाविष्करणं नात्मसंस्थः नच आत्माधीनः २७ कौमारं बालस्येवाशांतवचि
नै ३०

159

शास्त्रः ईश्वरस्य ३५ नर्द्धिः आध्यभावः नैकधेतिवत्समासः पर्यायः कालक्रमः तेन कृतं कर्माण्यपि कालमनुरुद्ध्यैव फलंति बीजानीव पर्जन्यं न

नाहं तदनुशोचामि नात्मभ्रंशं शचीपते एवं मे निश्चिता बुद्धिः शास्त्रं तिष्ठाम्यहं वशे ३१ बृहस्पते हि कुले जातो दर्श
नीयः प्रतापवान् दुःखं जीवन्महामात्यो भवितव्यं हि तत्तथा ३२ दौष्कुले यस्तथा मूढो दुर्जातः शक्र दृश्यते सुखं जीवन्म
हामात्यो भवितव्यं हि तत्तथा ३३ कल्याणी रूपसंपन्ना दुर्भगा शक्र दृश्यते अलक्षणा विरूपा च सुभगा दृश्यते परा ३४
नैतदस्मत्कृतं शक्र नैतच्छक्र त्वया कृतं यत्त्वमेवंगतो वज्रिन् यच्चाप्येवंगता वयं ३५ न कर्म भवता प्येतत्कृतं मम शतक्र
तो ऋद्धिर्वाप्यथवा नर्द्धिः पर्यायकृतमेव तत ३६ पश्यामि त्वां विराजंतं देवराजमवस्थितं श्रीमंतं द्युतिमंतं च गर्जमानं
ममोपरि ३६ एवं नैव न चेत्कालो मामाक्रम्य स्थितो भवेत् पातयेयमहं त्वाद्य सवज्रमपि मुष्टिना ३७ न तु विक्रम
कालोयं शांतिकालोयमागतः कालः स्थापयते सर्वं कालः पचति वै तथा ३८ मां चेदभ्यागतः कालो दानवेश्वर पूजि
तं गर्जंतं प्रतपंतं च कमन्यं नागमिष्यति ३९ द्वादशानां तु भवतामादित्यानां महात्मनां तेजांस्येकेन सर्वेषां देवराज ध्र
तानि मे ४० अहमेवोद्वहाम्यापो विसृजामि च वासव तपामि चैव त्रैलोक्यं विद्योताम्यहमेव च ४१ ॥ ॥ ॥

तु सतत इत्यर्थः ३६ सर्वं मम गर्द्दभत्वादिकं नैव स्यादिति शेषः न चेदित्यादि तत्रोपपत्तिः ३९ द्वादशानां अरुणोर्यमाघमासेंतु सत्येपि विफाल्गुने नत पेत्युक्तरूपाणां ४०
उद्वहामि मेघो भूत्वा सूर्यो भूत्वा शोषयामीति वार्थः आपः अपः ४१

मो० कालसैन्यं मासार्द्धमासादि ७३ नाहमितिद्वाभ्यां ह्रस्वमनत्वमितितस्य स्वरस्यनान्य इतिप्रकृतेषु कर्तृत्वं निषिद्धं पर्यायेणाकालं कालेनाभुज्यंते पाल्यंते संह्रियंते वा ७४
१६० को सौ कालस्तमाह मासेति मासाद्युपलक्षितं तस्माकिं कोभिन्नतद्रव्यविशेषः कालस्तस्यवेश्मवाधिष्ठानं तमापाशवृत्तं ब्रह्मलोकपर्यंः अहः संज्ञेः रात्रिसंज्ञेश्च ऋतुभिः
संवृतं नानैवैतान्यहानि भवंति नवैवप्राणाः नवस्तुवर्गोलोकाः नवस्वैव तत्स्वर्गेषु लोकेषु प्रतितिष्ठंते यंति प्रतितिष्ठंति ह्वैवं पश्यताराजत्रीरूपयंतीत्यार्षवादिकफलवताक
मेकांडेनगूहितमित्यर्थः उक्तं च भगवता पामिमांपुष्पितां वाचमित्यादिना एवमपि ऋतुद्वारं ऋतवः वसंताद्याः ब्राह्मणोग्निमादधीत वसंते वसंते ज्योतिषायजेतेति
| 60

संरक्ष्याणि विलुंपानि दद्दाम्यहमपाददे संयच्छामि पश्यामि लोकेषु प्रभुरीश्वरः ७२ तदद्य विनिवृत्तं मे प्रभुत्वममराधिप
कालसैन्यावगाढस्य सर्वं न प्रतिभाति मे ७३ नाहं कर्त्ता न चैवत्वं नान्यः कर्त्ता शचीपते पर्यायेणाहि भुज्यंते लोकाः शक्र
पदस्थया ७४ मासमासार्द्धवेश्मानमहोरात्राभिसंवृतं ऋतुद्वारं वर्षमुखमापुर्वेदविदोजनाः ७५ ॥ ॥

वसंतादिकालविहिताधानज्योतिष्टोमादिकंकर्मैव द्वारं प्राप्तिसाधनं यस्य तदृतुद्वारं वायुः सूत्रात्मा वायुर्वै गौतमतत्सूत्रं वायुना वै गौतमसूत्रेणायं च लोकः परश्च लोकः
सर्वाणि च भूतानि संदृब्धानीतिश्रुतिप्रसिद्धः सुखमिवप्रपन्नप्राप्यं यस्य तत्तद्वायुमुखं वर्षमुखमितिपाठे वर्षतीति वर्षी धर्ममेघाख्यंध्यानं तद्देवमुखं यस्यानिर्विष
यध्यानैकगम्यं कालमाहुरितिप्रसिद्धेन विशेषणाक्रियया संबंधः तमेमुरमेत मित्युपास्वेतिश्रुतेरायुः ब्रह्मतत्प्रतिपादको वेद उपनिषत्तद्विदः ७५ ॥ रा० म०
१६०

आहुरितेइदंसर्वंकालाख्यंब्रह्मेत्याहुः इदंसर्वंयदयमात्माब्रह्मैवेदंसर्वमित्यागमवाक्येनतत्त्वब्रह्मचिंत्यंध्येयमितिकेचिन्मनीषिणोमिन्यादय आहुर्मनी
षयाबुद्ध्यैवनतुशास्त्रबलेन। अस्त्विदंसर्वंब्रह्मनतुप्रत्यगभिन्नत्वेनतदुपास्यंकिंतुवस्तवतत्त्वमेवतत्त्रयाशेयमित्यर्थः तदेवब्रह्मत्वंविद्धिनेदंयदिदमु
न३ पासतेइतिश्रुत्यासकृदुपास्यस्यब्रह्मभावनिषेधात्। ननुश्रेयत्वमपिब्रह्मणोनिषिद्धंयन्मनसानमनुतइत्यादिश्रुत्येत्यतआहअस्याइति अस्याश्चिंतायाः
पंचैवचिंत्यान्विषयान्अन्नमयविज्ञानमयानंदमयान्कोशान्पंचधाप्रत्येकंपंचप्रकारान्पक्षद्वयशिरोमध्यदेशपुच्छाख्यपंचावयवविशिष्टान्प
र्येष्यामिश्रुतौअवगच्छामि।तथाहिश्रूयंतेसवाएषपुरुषोन्नरसमयः।तस्येदमेवशिरः अयंदक्षिणःपक्षः अयमुत्तरःपक्षः अयमात्मा।इदंपुच्छंप्र

आहुःसर्वमिदंचिंत्यंजनाःकेचिन्मनीषया अस्याःपंचैवचिंता
याःपर्येष्यामिचपंचधा ४६

तिष्ठेतिप्रतिपुरुषंशिरआदयःपंचैवावयवाःतदयमर्थःप्रतज्ञेयंयच्चोपास्यंनतद्ब्रह्म अनात्मत्वात् आत्माहिब्रह्मात्कथंतर्हीदंसर्वंयदयमात्मेतिबाधा
यांसामानाधिकरण्यमिदमितिब्रूमः यद्रजतंसआत्माशुक्तिरितिवत् अपिचाहुर्वृद्धाः योयंस्थाणुःपुमानेषपुंधियास्थाणुधीरिवब्रह्मास्मीतिधीयाऽशेषा
हंबुद्धिर्विनिवर्तितइति। शेषाहंबुद्धिःसमस्ताहंकारः एतेक्रियेतायथास्फटिकेलोहित्यपद्मरागत्वेंद्रनीलत्वान्यध्यस्यानृजत्वरूपबाधेपूर्वपूर्वमेव
नातिकंमन्यतेएवंशुद्धंचैतन्येईशसूत्रविराजोध्यस्ताःतत्रदेहपरिच्छेदाभिमाननिवृत्त्योविराडस्मीत्यध्यासोवशिष्यतेतन्निवृत्त्योसूत्रात्मास्मीतितस्या
पिनिवृत्तौईशोस्मीति।तस्यापिनिवृत्तौवाङ्मनसातीतंकिंचित्सन्मात्रंसुषुप्तिसदृशंशिष्यतेइति ४६

तदेतदाह गंभीरमिति। गंभीरं तर्काऽगम्यं। गहनं शास्त्रतोऽधिगतमपि दुःप्रवेशं। ब्रह्म त्रिविधपरिच्छेदशून्यं। महत्त्वे पाराविपारावारशून्यार्णवतुल्यं सलिलस्यैको
द्रष्टाऽद्वैतो भवतीति श्रुतावतादृशसलिलेनोपमितमेकरसमित्यर्थः क्षरं शुक्तिरिव रजतरूपेण स्वतो जन्मनाशशून्यमपि जगद्रूपेणाक्षरं अक्षरं जीवरूपेण
निर्विशेषमेव वस्तु अविद्यया सर्वविशेषयुक्तं भवतीत्यर्थः ४७ एतदेवाह सत्वेष्विति यथा दर्पणेषु मुखं प्रविश्य स्वरूपस्य अगमकमपि गमकं भवति एवं स
त्वेषु बुद्धिसत्वेषु बुद्धिसत्वेषु चित्प्रतिबिंबरूपेणाविश्य लिंगं निरुपाधिचैतन्यस्य ज्ञापिकं भवति जीवस्यैवानुपाधिकं रूपं ब्रह्मेत्यर्थः अत एव श्रुतं उपाधिधर्मा

गंभीरं गहनं ब्रह्म महत्तोयार्णवप्रभा अनादिनिधनं चाहुरक्षरं क्षरमेव च ४७ सत्वेषु लिंगमाविश्य निर्लिंगमपि तत्
त्स्वयं मन्यंते ध्रुवमेवैनं ये जनास्तत्वदर्शिनः ४८ भूतानां तु विपर्यासं कुरुते भगवानिति न ह्येतावद्भवेद्गम्यं न यस्मा
त्प्रभवेत्पुनः ४९ गतिं हि सर्वभूतानामगत्वाक्व गमिष्यसि यो धावता न हातव्यो सितिष्ठन्नपि न हीयते ५० ॥ ॥ ॥ ॥

स्पर्शिनि ४८ भूतानामिति चिन्नाधाकारपरिणतपंचमहाभूतसंबंधिनं विपर्यासं संविदानंदानंतविपरीतं अनृतजडदुःखपरिछिन्नाख्यं ह्यधर्मगतं भगवान
पि अविद्यात्मनि मन्यते। न ह्येतावदविद्याप्रकाशितं दुःखित्वादिरूपं आत्मनो गम्यं नित्यज्ञातं त्वात्तस्य किंतु यस्मात्प्रतीचो रूपात्तु न रन्यो ब्रह्मा रुद्रो विष्णुर्वा न प्रभ
वेत्तदेवात्मनो रूपं अत एव चानन्याधिपतिरिति निन्यापात ४९ गतिमिति अगत्वा अप्राप्य नित्यप्राप्तत्वादिति भावः अहेयत्वमविकारित्वं चोत्तरार्धार्थः ५० ॥

य

इंद्रियाणीति चित्तवृत्तिमात्रोपलक्षणं पंचधा पंचभिः प्रमाणविपर्ययविकल्पनिद्रास्मृताख्यैः प्रकारैः एतं इंद्रियाद्यात्मं केचिदौपनिषदा अग्निं अपर
अग्निर्वैश्वानरो योऽयमंतःपुरुषे। अहं वैश्वानरो भूत्वेत्यादिश्रुतिस्मृतिप्रसिद्धं जाठरं आरोप्योपास्यं आहुः अपरे कर्मपरायणाः प्रजापतिं संवत्सरः प्रजापति

तामिंद्रियाणि सर्वाणि नानुपश्यंति पंचधा आहुश्चैनं केचिदग्निं केचिदाहुः प्रजापतिं ५१ ऋतून्मासार्द्धमासांश्च दिवसां
स्त्वक्षणांस्तथा पूर्वाह्णमपराह्णं च मध्याह्नमपि चापरे ५२ मुहूर्त्तमपि चैवाहुरेकं संतमनेकधा तं कालमिति जानीहि य
स्य सर्वमिदं वशे ५३ बहूनींद्रसहस्राणि समतीतानि वासव बलवीर्योपपन्नानि यथैव त्वं शचीपते ५४ त्वामप्यतिबलं
शक्र देवराजं बलोत्कटं प्राप्ते काले महावीर्यः कालः संशमयिष्यति ५५ य इदं सर्वमादत्ते तस्माच्छक्र स्थिरो भव मया
त्वया च पूर्वैश्च न स शक्योतिवर्त्तितुं ५६ यामेतां प्राप्य जानीषे राजश्रियमनुत्तमां स्थिता मयीति तन्मिथ्या नैषा ह्येकत्र तिष्ठ
ति ५७ स्थिता हींद्रसहस्रेषु त्वद्विशिष्टतमेष्वियं मां च लोका परित्यज्य त्वामगाद्विबुधाधिप ५८ मैवं शक्र पुनः कार्षीः
शांतो भवितुमर्हसि त्वामप्येवंविधं ज्ञात्वा क्षिप्रमन्यं गमिष्यति ५९ अध्यायः समाप्तः॥ ॥ ॥ ॥ ॥

रिति श्रुते कालाभिमानिनं सूत्रात्मानं सर्वकर्मसंततपरिणामं प्रतिनियतकालसर्वफलप्रदातारं ऋतुमासाद्यभिमानिदेवतात्मानमाहुः एकं संतं अनेकधा आहुः
तथा च श्रुतिः सुपर्णं विप्राः कवयो वचोभिरेकं संतं बहुधा कल्पयंतीत्याद्या। तथा यदिदमाहुरमुं यजामुं यजेत्येतस्यैव सा विसृष्टिरित्याद्या च ५९ पंचशत्तमः॥

मो० श्रीदर्पशमनायश्रियश्चांचलस्य आरव्यापिकासुरेवनाहमसंगाच्छ्रीदानश्रीध्यानश्चधर्मानकथयतिशतक्रतुरित्यध्यायेन १ २ ३ १०
१६२

भीष्मउवाच शतक्रतुरथापश्यद्बलेर्दीप्तांमहात्मनः स्वरूपिणींशरीराद्धिनिष्क्रामंतींतदाश्रियं १ तांदृष्ट्वाप्रभयादीप्तांभगवा
न्पाकशासनः विस्मयोत्फुल्लनयनोबलिंपप्रच्छवासवः २ शक्रउवाच बलेकेयमपक्रांतारोचमानाशिखंडिनीत्वत्तःस्थि
तासकेयूरादीप्यमानास्वतेजसा ३ बलिरुवाच नहीमामासुरींवेद्मिनदेवींनचमानुषीं त्वमेनांपृच्छवामावायथेष्टंकुरुवास
व ४ शक्रउवाच कात्वंबलेःपराक्रांतारोचमानाशिखंडिनी अजानतोममाचक्ष्वनामधेयंशुचिस्मिते ५ कात्वंतिष्ठसि
मामेवदीप्यमानास्वतेजसा हित्वादैत्येश्वरंसुभ्रुतन्ममाचक्ष्वपृच्छतः ६ श्रीरुवाच नमांविरोचनोवेदनापिवैरोचनोबलिः
आहुर्मांदुःसहेत्येवंविधित्सेतिचमांविदुः ७ भूतिर्लक्ष्मीतिमामाहुःश्रीरित्येवंचवासव त्वंमांशक्रनजानीषेसर्वेदेवानमां
विदुः ८ शक्रउवाच किमिदंत्वंममकृतेउताहोबलिनःकृते दुःसहेविजहास्येनंचिरसंवासिनीसती ९ श्रीरुवाच
नोधातानविधातामांविदधातिकथंचन कालस्तुशक्रपर्यायान्मैनंशक्रावमन्यथाः १० शक्रउवाच कथंत्वयाबलिस्त्यक्तः
किमर्थंवाशिखंडिनी कथंचमांनजह्यास्त्वंतन्मेब्रूहिशुचिस्मिते ११

राम०
१६२

श्रीरुवाच सत्येस्थितास्मिदानेचव्रतेतपसिचैवहि पराक्रमेचधर्मेचपराचीनस्ततोवलिः १२ ब्रह्मण्योयंपुराभूत्वासत्यवादीजितेंद्रियः
अभ्यसूयद्ब्राह्मणानामुच्छिष्टश्चास्पृशद्धुतं १३ यज्ञशीलः सदाभूत्वामामेवयज्ञतेस्वयं प्रोवाचलोकान्मूढात्माकालेनोपनिपीडितः
१४ अपाकृताततः शक्रत्वयिवत्स्यामिवासव अप्रमत्तेनधार्यास्मितपसाविक्रमेणच १५ शक्रउवाच नास्तिदेवमनुष्येषुसर्वभू
तेषुवापुमान् यस्त्वामेकोविसहितुंशक्नुयात्कमलालये १६ श्रीरुवाच नैवदेवानगंधर्वानासुरानचराक्षसः योमामेकोविस
हितुंशक्तः कश्चित्पुरंदरं १७ शक्रउवाच तिष्ठयामयितित्वंयथावद्ब्रूहिमेशुभे तत्करिष्यामितेवाक्यंतंत्वद्वक्तुमर्हसि १८
श्रीरुवाच स्थास्यामिनित्यंदेवेंद्रयथात्वयिनिबोधतत् विधिनावेददृष्टेन चतुर्द्धाविभजस्वमां १९ शक्रउवाच अहंवैत्वा
निधास्यामियथाशक्तियथावलं नतुमेतिक्रमः स्याद्वैसदालक्ष्मितवांतिके २० भूमिरेवमनुष्येषुधारिणीभूतभाविनी
सातेपादंतितिक्षेतसमर्थाहीतिमेमतिः २१ श्रीरुवाच एषमेनिहितः पादोयोयंभूमौप्रतिष्ठितः द्वितीयंशक्रपादंमेत
स्मात्सुनिहितंकुरु २२ शक्रउवाच आपएवमनुष्येषुद्रवंत्यः परिचारिणीः तास्तेपादंतितिक्षंतामलमापस्तितिक्षितुं २३

२३ २३ २३

मो० १६३ विन्नंतीर्थादिपुराणंयशादिर्धर्मश्चविद्याचेतिश्रियश्चत्वारः पादाः भूतेजलेग्नौविद्वत्सुचनिहिताः तेषामुपघातस्तेपकामाशोचाशमेः २८

163

श्रीरुवाच एषमेनिहितःपादोयोपमस्सुप्रतिष्ठितः तृतीयंशक्रपादंमेतस्मात्सुनिहितंकुरु २४ शक्रउवाच
यस्मिन्वेदाश्चयज्ञाश्चयस्मिन्देवाः प्रतिष्ठिताः तृतीयंपादमग्निस्तेसुधृतंधारयिष्यति २५ श्रीरुवाच एष
मेनिहितःपादोयोपमग्नौप्रतिष्ठितः चतुर्थंशक्रपादंमेतस्मात्सुनिहितंकुरु २६ शक्रउवाच येवैसंतोम
नुष्येषुब्राह्मणाःसत्यवादिनः तेतेपादंतितिक्षंतामलंसंतस्तितिक्षितुं २७ श्रीरुवाच एषमेनिहितःपादोयोयंस
त्सुप्रतिष्ठितः एवंहिनिहितांशक्रभूतेषुपरिधत्स्वमां २८ शक्रउवाच भूतानामिहयोवैत्वांमयाविनिहितांसतीं
उपहन्यात्समेधृष्यस्तथाप्यएवंतुमेवचः ततस्यक्तःश्रियाराजादैत्यानांबलिरब्रवीत २८ ॥ ॥ ॥

राम० १६३

यावत्पुरस्तादिति मेरोः पृष्ठे मध्ये ब्रह्मलोकः प्राच्यादिचतुर्दिक्षु इंद्रयमवरुणकुबेराणां पुर्यश्च मेरुं प्रदक्षिणीकुर्वता आदित्येन भास्यंते तत्र भास्यापेक्षं भासकत्वमतो यस्याः पुर्याः उर्ध्वेदस्तत्रादित्यो न्यतीतिव्यवहारः तथा सूर्यस्य उदयस्तद्देशवासिनो दर्शनमदर्शनं चास्तमयः तत्र प्राच्यामुदितः प्रतीच्यामस्तंगतः दाक्षिणात्यानां तदा मध्यरात्रमिति च व्यवहारः एवं दक्षिणादिक्ष्वपि ज्ञेयं एवं सति यदा प्राच्यां तपति तदा मेरुप्रदक्षिणायास्तत्कल्पत्वादितरास्वपि तपत्येव तेन यावत्प्राच्यां तपति तावदेव दक्षिणास्यामिति वदता प्राच्या उर्ध्वेदो यावता कालेन तत्तोद्विगुणितेन कालेन दक्षिणस्या उर्ध्वेदः उक्तो भवति एवमुत्तरयोस्तथा च ब्रह्मणो दिनस्य षोडशांशो विभक्तः स्याप्रथमेनांशेन एकस्या उर्ध्वेदः द्वाभ्यां संयमिन्याः चतुर्भिर्वरुणस्याः त्रयमिरुदीच्या उर्ध्वेदस्तदा ब्रह्मणानभावात्सूर्यस्य दर्शनादर्शनरूपो उदयास्तमयो न स्तः

बलिरुवाच यावत्पुरस्तात्प्रतपेन्नावद्वै दक्षिणां दिशं पश्चिमां तावदेवापि तथोदीचीं दिवाकरः २९
तथा मध्यंदिने सूर्यो नास्तमेति यदा तदा पुनर्देवासुरं युद्धं भावि ज्ञातास्मि वस्तदा ३० सर्वलोकान्पदा दि
त्यएकस्य राज्यापयिष्यति तदा देवासुरे युद्धे जेताहं त्वां शतक्रतो ३१ ॥ ॥ ॥

किंतु मध्यंदिने एव संततं ब्रह्मलोकं प्रकाशयति न पुर्यंतरं तदा तदभावात्तदेतदाह एकस्यां ब्रह्मलोकस्थः सर्वान्लोकान्मेरुपृष्ठादधस्तनान्न तापयति तदा ब्रह्मणो मध्याह्नावसाने वर्त्तमानवैवस्वतमनोरधिकारच्युतो भस्याभविष्ये सावर्णिकमनौ बलिरिंद्रो भविष्यति यद्वा वैवस्वतमन्वंतरमेवाष्टधा विभज्यतदंते उक्तक्रमेण सर्वपुर्युर्ध्वेदे सति मन्वंतरांतरे बलिरिंद्रो भविष्यतीति ज्ञेयं तदिदमुक्तं यावत्पुरस्तात्प्रतपेदित्यादिना श्लोकत्रयेण अयं च लोक नाशक्रमः षष्ठांशे ज्ञेयः ध्रुवविद्यायां यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावद्दक्षिणत उदेतोत्तरतोस्तमेतेत्यादिना दर्शितः सएवात्र बलिना स्वराज्यकालकथनायोदीर्यते २९

मो० तत्रमन्वंतरस्याष्टमांशकालेनस्वराज्योच्छेदंस्मृत्वाकुपितः कर्मफलस्यैंद्रपदस्यानित्यतांमन्वानइंद्रः परुषोक्तिपूर्वकंतत्तद्दूषयतिब्रह्मणोन्यादिनामध्यमास्थितः
१६४ सन्नैवतत्पितापुरीचतुष्टयोच्छेदोनैवभवितेत्यर्थः ३३ अजस्रंसततेनकर्मरागात्पाहिकर्मठाःप्राहुर्नकदाचिदनीदृशंजगदिति ३५ एवमुक्तस्त्विति त्रय

164

शक्रउवाच ब्रह्मणास्मिसमादिष्टोनहंतव्योभवानिति तेनतेहंबलेवज्रंनविमुंचामिमूर्द्धनि ३१ यथेष्टंगच्छ
दैत्येंद्रस्वस्तितेस्तुमहासुर आदित्योनैवतपिताकदाचिन्मध्यतःस्थितः ३३ स्थापितोह्यस्यसमयःपूर्वमेवस्व
यंभुवा अजस्रंपरियात्येषसत्येनावतपन्प्रजाः ३४ अयनंतस्यषण्मासानुत्तरंदक्षिणंतथा येनसंयाति
लोकेषुशीतोष्णेविसृजन्रविः ३५ भीष्मउवाच एवमुक्तस्तुदैत्येंद्रोबलिरिंद्रेणभारत जगामदक्षि
णामाशामुदीचींतुपुरंदरः ३६

तु

भावः एकसप्तत्याचतुर्युगैःएकोमनुर्नश्यतितस्येदानीमष्टाविंशतितमोयुगपर्यायोनुवर्त्ततेतत्रोक्तरीत्याचैंपंचशिनरेंद्रीसंयमिन्योरुच्छेदोजात
एवावारुणपात्र्यपिक्षयकालःप्रवृत्तःउदीच्यास्तुनप्रवृत्तइत्याशयेनइंद्रउदीचींगतःबलिस्तुभ्रष्टश्रीत्वाद्दक्षिणामेवदक्षिणांगतःनतुपूर्वांत
स्याःभ्रष्टैश्वर्यस्यापिशत्रुसन्निहितत्वादिति ३६ राम०
१६४

ननुपुरारागांतरे चतसृणामपि पुरीणां सहैवोच्छेदो दृष्टस्तेनोक्तक्रमेणोत्पाशंका हइ स्येतदिति अनहंकार इति संज्ञामात्रं वाक्यस्य किंतु किंचित्साहंकारमेवेतत्पर्वः
एवं चात्र त्रयः पक्षा उपन्यस्ताः निरहंकारस्य युगपत्सर्वोच्छेदः पुरारागांतरसंमतः साहंकारस्य द्रष्टस्तेन कदाचित्पुष्ठिदोस्ति यथा क्रमेवासिष्ठे यत्राहंत्वं जगत्तत्र

इत्येतद्बलिना गीतमनहंकारसंज्ञितं वाक्यं श्रुत्वा सहस्राक्षः खमेवारुरुहे तदा २७ शांतौ मोक्षधर्मेषु सन्निधानोना
म भीष्म उवाच अत्रैवोदाहरंतीममितिहासं पुरातनं शतक्रतोश्च संवादं नमुचेश्च युधिष्ठिर १ श्रिया विहीन
मासीनमक्षोभ्यमिव सागरं भवाभवज्ञं भूतानामित्युवाच पुरंदरः २ बद्धः पाशैश्च्युतः स्थानाद्द्विषतां वशमागतः
श्रिया विहीनो नमुचे शोचस्याहो न शोचसि ३ नमुचिरुवाच अनिवार्येण शोकेन शरीरं चोपतप्यते अमित्रा
श्च प्रहृष्यंति शोके नास्ति सहायता ४ तस्माच्छक्र न शोचामि सर्वं ह्येवेदमंतवत् संतापाद्भ्रश्यते रूपं संतापाद्भ्रश्य
ते श्रियः ५ संतापाद्भ्रश्यते चायुर्धर्मश्चैव सुरेश्वर विनीय खलु तद्दुःखमागतं वैमनस्यजं ६ ॥ ॥

पूर्वमागत्य तिष्ठति नमसेरा हूरेपीद्रः पश्यति स्म जगत्त्रयमिति साहंकारस्यापि विविकिनो बलेः क्रमिकनाशयुक्तं जगदिति श्रुत्वाउदीचीं प्राप्य श्रुति
युक्तिबलेन पर्यालोच्य खं हार्द्दाकाशं आरुरोह २७ एकपंचाशत्तमः अत्रैव अनहंकारत्वे एव १ भवाभवज्ञं उत्पत्तिप्रलयज्ञं २ सहायता शोक
स्य दुःखापनोदे हेतुत्वं नास्तीत्यर्थः ४ श्रियः सकाशात् ५ विनीय निरस्य ६

हृद्यं हृत्स्थं स्वरूपं कल्याणं मोक्षं । एक इति अन्यं न पश्यामि स्वरूपमेव कल्याणमित्यर्थः । प्रवणात् निम्नदेशात् ८ भवाभवौ बंधमोक्षौ भावाभावाविति पाठे
सत्यानृतौ तावेवाभितो ज्ञानवतः यो गरीयः परमं श्रेयो मोक्षं गुरुतरत्वेन ज्ञात्वापि न करोमि श्रवणाद्यभ्यासेन संपादयामि ९ यस्तु अत्र धर्म्यासु निमित्तम्

ध्यातव्यं मनसा हृद्यं कल्याणं संविजानता यदा यदा हि पुरुषः कल्याणे कुरुते मनः तदा तस्य समासिध्यंति सर्वा
र्था नात्र संशयः ७ एकः शास्ता न द्वितीयोस्ति शास्ता गर्भे शयानं पुरुषं शास्ति शास्ता तेनानुयुक्तः प्रवणादिवो
दकं यथा नियुक्तोस्मि तथा वहामि ८ भावाभावौ त्वभिजानन् गरीयो ज्ञानाच्छ्रेयो न तु तज्जहे करोमि आशासु धर्म्यासु प
रासु कुर्वन् यथा नियुक्तोस्मि तथा वहामि ९ यथा यथास्य प्राप्तव्यं प्राप्नोत्येव तथा तथा भवितव्यं यथा य
च्च भवत्येव तथा तथा १० यत्र यत्रैव संयुक्तो धाता गर्भे पुनः पुनः तत्र तत्रैव वसति न यत्र स्वयमिच्छति
११ भावो योयमनुप्राप्तो भवितव्यमिदं मम इति यस्य सदा भावो न स मुह्येत्कदाचन १२ पर्यायैर्हन्यमाना
नामभियोक्ता न विद्यते दुःखमेतत्तु यद्द्वेष्टा कर्ताहमिति मन्यते १३ ॥ ॥ ॥ ॥

तासु कुर्वन्कर्माणि नियुक्तः शास्त्रा ११ पर्यायैः कालक्रमागतैः सुखदुःखैः द्वेष्टा दुःखस्याकर्ता अहमित्यभिमान एव दुःखमित्यर्थः १३ ॥ ॥

आपदः कांतपुरुषान्नोपनमंतिनानुसरंति अपितुसर्वनिवपरावरज्ञाः सदसद्वस्तुविदः नसंभ्रमंतिनबिभ्यति १४ नाभिपद्यतेनसज्जते अ
तिकृच्छ्रव्यसनेषुदुर्निवार्येषुदुःखेषु १६ प्रणुदन्दूरीकुर्वन् १७ विवेकतौर्लभ्यमाहानतदिति।श्रौतस्मार्तलौकिकन्यायान्नायविवेचकाज्ञ
नसमाजाः सदः पर्षत्सभाख्याः भयंधर्मविप्लवइंधुरंधरः समस्रेष्ठः धर्मतत्वमपिदुरवगाहंकिंतुतत्वब्रह्मतत्वमितिभावः १८ दुरन्वयानिदुर्ज्ञे

ऋषींश्चदेवांश्चमहासुरांश्चत्रैविद्यवृद्धांश्चवनेमुनींश्च कान्तापदोनोपनमंतिलोकेपरावरज्ञास्तुनसं
भ्रमंति १४ नपंडितःक्रुध्यतिनापिसज्जतेनचापिसंसीदतिनप्रहृष्यति नचातिकृच्छ्रव्यसनेषुशोचतेस्थि
तःप्रकृत्याहिमवानिवाचलः १५ यमर्थसिद्धिःपरमानहर्षयेत्तथैवकालेव्यसनंनमोहयेत् सुखंचदुःखं
चतथैवमध्यमंनिषेवतेयःसधुरंधरोनरः १६ यांयामवस्थांपुरुषोऽधिगच्छेत्तस्यांरमेतापरितप्यमानः एवंप्रवृ
द्धंप्रणुदेन्मनोजंसंतापमायासकरंशरीरात् १७ नतत्सदःसत्परिषत्सभाचसाप्राप्ययांनकुरुतेसदाभयं धर्म
तत्वमवगाह्यबुद्धिमान्योऽभ्युपैतिसधुरंधरोनरः १८ प्राज्ञस्यकर्माणिदुरन्वयानिनवैप्राज्ञोमुह्यतिमोहकाले स्था
नाच्युतश्चेन्नमुमोहगौतमस्तावत्कृच्छ्रामापदंप्राप्यवृद्धः १९

योदर्काणिनमुमोहगौतमइतिपाठेअहिल्याजारस्यइंद्रस्यत्रपाजननार्थमर्मोद्घाटनंगौतमस्यचदारापहारेपिधैर्यवर्णनंस्थानात्अहिल्यायाः श
प्तत्वेनशिलारूपत्वात्गार्हस्थ्यात्च्युतः नत्वत्महशोहमजितचित्तोस्मिकिंतुगौतमवज्जितचित्तोस्मीतिभावः १९ ॥ ॥ ॥ ॥ ॥

मो०
१६६

166

अलभ्यंचिन्नस्वास्थ्यं २३ द्विपंचाशः मग्नस्यव्यसनेकृच्छ्र इत्यादिनाऽध्यायेनविपदिधैर्यमेवश्रेयइतिपुनर्बलिवासवसंवादाख्यायिकामुखेनप्रदर्शयति ६७

नमंत्रबलवीर्येणप्रज्ञयापौरुषेणच नशीलेननवृत्तेननतथानैवार्थसंपदा अलभ्यंलभतेमर्त्यस्तत्रकापरिदेवना २०
यदेवमनुजातस्यधातारोविदधुःपुरा तदेवानुचरिष्यामिकिंमेमृत्युःकरिष्यति २१ लब्धव्यान्येवलभतेगंतव्यान्येवग
च्छति प्राप्तव्यान्येवचाप्नोतिदुःखानिचसुखानिच २२ एतद्विदित्वाकार्त्स्न्येनयोनमुह्यतिमानवः कुशलीसर्वदुः
खेषुसवैसर्वधनोनरः २३ शांतौमोक्षधर्मेषुशक्रनमुचिसंवादे॥ ॥युधिष्ठिरउवाच मग्नस्यव्यसनेकृच्छ्रेकिंश्रे
यःपुरुषस्यहि बंधुनाशेमहीपालराज्यनाशेपवापुनः १ त्वंहिनःपरमोवक्तालोकेस्मिन्पुरुषर्षभ एतद्भवंतंपृच्छामि
तन्मेत्वंवक्तुमर्हसि २ भीष्मउवाच पुत्रदारैःसुखैश्चैवविप्रयुक्तस्यधनेनवा मग्नस्यव्यसनेकृच्छ्रेधृतिःश्रेयस्करीनृप
३ धैर्येणयुक्तस्यसततंशरीरंनविशीर्यते विशोकतासुखंधत्तेधत्तेचारोग्यमुत्तमं ४ आरोग्याच्चशरीरस्यसपुनर्विंदतेश्रि
यं यश्चप्राज्ञोनरस्तातसात्विकींवृत्तिमास्थितः ५ तस्यैश्वर्यंचधैर्यंचव्यवसायश्चकर्मसु अत्रैवोदाहरंतीममिति
हासंपुरातनं ६ बलिवासवसंवादंपुनरेवयुधिष्ठिर वृत्तेदेवासुरेयुद्धेदैत्यदानवसंक्षये ७ ॥ ॥ ॥ राम०
१६६

विष्णुक्रांतेषुलोकेषुदेवराजेशतक्रतौ इज्यमानेषुवेदेषुचातुर्वर्ण्येव्यवस्थिते ८ चतुर्दंतंसुदांतंचवारणेंद्रंश्रियावृतं आरुह्यैराव
णंशक्रस्त्रैलोक्यमनुसंययौ ९ सकदाचित्समुद्रांतेकस्मिंश्चिद्गिरिगह्वरे बलिंवैरोचनिंवज्रीददर्शोपससर्पच १० तमैरावतमूर्द्ध
स्थंप्रेक्ष्यदेवगणैर्वृतं सुरेंद्रमिंद्रंदैत्येंद्रोनशुशोचनविव्यथे ११ दृष्ट्वातमविकारस्थंतिष्ठंतंनिर्भयंबलिं अधिरूढोद्विपश्रेष्ठमित्युवा
चशतक्रतुः १२ दैत्यनव्यथसेशौर्यादथवावृद्धसेवया तपसाभावितत्वाद्वासर्वथैतत्सुदुष्करं १३ शत्रुभिर्वशमानीतोहीनः
स्थानादनुत्तमात् वैरोचनेकिमाश्रित्यशोचितव्येनशोचसि १४ श्रैष्ठ्यंप्राप्यस्वजातीनांमहाभोगाननुत्तमान हृतस्वरत्नराज्य
स्त्वंब्रूहिकस्मान्नशोचसि १५ ईश्वरोहिपुराभूत्वापितृपैतामहेपदे तत्त्वमद्यहृतंदृष्ट्वासपत्नैःकिंनशोचसि १६ बद्धश्चवा
रुणैःपाशैर्वज्रेणचसमाहतः हृतदारोहृतधनोब्रूहिकस्मान्नशोचसि १७ नष्टश्रीर्विभवभ्रष्टोयन्नशोचसिदुष्करं। त्रैलो
क्यराज्यनाशेहिकोन्योजीवितुमुत्सहेत् १८ एतच्चान्यच्चपरुषंब्रुवंतंपरिभूयतं श्रुत्वासुखमसंभ्रांतोबलिर्वैरोचनोब्रवी
त् १९ बलिरुवाच निगृहीतेमयिभृशंशक्रकिंकत्थितेनते वज्रमुद्यम्यतिष्ठंतंपश्यामित्वांपुरंदर २० अशक्तःपूर्वमासी
स्त्वंकथंचिच्छक्ततांगतः कस्त्वदन्यइमांवाचंसुक्रूरांवक्तुमर्हति २१ यस्तुशत्रोर्वशस्थस्यशक्तोपिकुरुतेदयां हस्तप्राप्तस्य

मो०
१६७
167

वीरस्तत्त्वैवपुरुषंविदुः २२ अनिश्चयोहियुद्धेषुद्वयोर्विवदमानयोः एकःप्राप्नोतिविजयमेकश्चैवपराजयं २३ माचतेभूत्स्वभावो
यमितिदेवतपुंगव ईश्वरःसर्वभूतानांविक्रमेणजितोबलात् २४ नैतदस्मत्कृतंशक्रनैतच्छक्रकृतंत्वया यत्त्वमेवंगतोवज्रिन्यद्वा
प्येवंगतावयं २५ अहमासंयथाद्यत्वंभवितात्वंयथावयं मावमंस्थामयाकर्मदुष्कृतंकृतमित्युत २६ सुखदुःखेहिपुरुषःपर्याये
णाधिगच्छति पर्यायेणासिशक्रत्वंप्राप्तःशक्रनकर्मणा २७ कालःकालेनयतिमांत्वांचकालोनयत्ययं तेनाहंत्वंयथानाद्यत्वंचापि
नयथावयं २८ नमातृपितृशुश्रूषानचदेवतपूजनं नान्योगुणसमाचारःपुरुषस्यसुखावहः २९ नविद्यानतपोदानंनमित्रा
णिनबांधवाः शक्नुवंतिपरित्रातुंनरंकालेनपीडितं ३१ नागामिनमनर्थंहिप्रतिघातशतैरपि शक्नुवंतिप्रतिव्योढुमृतेबुद्धिबला
न्नराः पर्यायैर्हन्यमानानांपरित्राताननविद्यते इदंतुदुःखंयच्छक्रकर्ताहमितिमन्यसे ३२ यदिकर्ताभवेत्कश्चिन्नक्रियेतक
दाचन यस्मात्तुक्रियतेकर्तातस्मात्कर्ताप्यनीश्वरः ३३ कालेनत्वाहमजयंकालेनाहंजितस्त्वया गंतागतिमतांकालःकालःका
लयतिप्रजाः ३४ इंद्रप्राकृतयाबुद्ध्याप्रलयंनावबुध्यसे केचित्त्वांबहुमन्यंतेश्रैष्ठ्यंप्राप्तंस्वकर्मणा ३५ कथमस्मद्विधोनामजानन्
लोकप्रवृत्तयः कालेनाभ्याहतःशोचेन्मुह्येद्वाप्यथविभ्रमेत् ३६ नित्यंकालपरीतस्यममवामद्विधस्यवा बुद्धिर्व्यसनमासाद्यभि
न्नानौरिवसीदति ३७ अहंचत्वंचयेचान्येभवि

राम०
१६७

ध्यंतिसुराधिपाः तेसर्वेशक्रपाप्मानंतिमार्गमिंद्रशनैर्गतं ३८ त्वामप्येवंसुदुर्धर्षज्वलंतंपरयाश्रिया कालेपरिणतेकालः
कालयिष्यतिमामिव ३९ वहूनींद्रसहस्राणिदेवतानांयुगेयुगे अभ्यतीतानिकालेनकालोहिदुरतिक्रमः ४० इदंतुलब्ध्वासं
स्थानमात्मानंवहुमन्यसे सर्वभूतभवंदेवंब्रह्माणमिवशाश्वतं ४१ नचेदमचलंस्थानमनंतंवापिकस्यचित् त्वंतुवालिश
पावुध्याममेदमितिमन्यसे ४२ अविश्वस्तेविश्वसिषिमन्यसेचाध्रुवेध्रुवं नित्यंकालपरीतात्माभवत्येवंसुरेश्वर ४३ ममे
यमितिमोहात्त्वंराजश्रियमभीप्ससि नेयंतवनचास्माकंनचान्येषांस्थिरासदा ४४ अतिक्रम्यवहूनन्यांस्त्वयिता
वदियंगता कंचित्कालमियंस्थित्वात्वयिवासववंचला ४५ गौर्निवासमिवोत्सृज्यपुनरन्यंगमिष्यति राजलोकाह्यतिक्रांता
यान्नसंख्यातुमुत्सहे ४६ त्वत्तोवहुतराश्चान्येभविष्यंतिपुरंदर सवृक्षौषधिरत्नेयंससत्ववनाकरा ४७ तानिदानींनपश्या
मियैर्भुक्तेयंपुरामही पृथुरैलोमयोभौमोनरकःशंवरस्तथा ४८ अश्वग्रीवःपुलोमाचस्वर्भानुरमितध्वजः प्रह्लादोनमु
चिर्दक्षोविप्रचित्तिर्विरोचनः ४९ ह्रीनिषेवःसुहोत्रश्चभूरिहापुष्पवान्वृषः सत्येषुर्ऋषभोवाहुःकपिलाश्वोविरूपकः
५० वाणःकार्तस्वरोवह्निर्विश्वदंष्ट्रोथनैर्ऋतिः संकोचोथपरीताक्षोवराहाश्वोरुचिप्रभः ५१ विश्वजित्प्रतिरूपश्चवृषांडो

मो० विस्कोमधुः हिरण्यकशिपुश्चैवकैटभश्चैवदानवः ५२ दैतेयादानवाश्चैवसर्वेतेनिरृतैःसह एतेचान्येचबहवःपूर्वेपू
१६८ र्वतराश्चये ५३ दैत्येंद्रादानवेंद्राश्चयांश्चान्याननुशुश्रुम बहवःपूर्वदैत्येंद्राःसंत्यज्यपृथिवींगताः ५४ कालेनाभ्याहताः
168 सर्वेकालोहिबलवत्तरः सर्वैःक्रतुशतैरिष्टंनत्वमेकःशतक्रतुः ५५ सर्वेधर्मपराश्चासन्सर्वेसततसत्रिणः अंतरिक्षचराः
सर्वेसर्वेभिमुखयोधिनः ५६ सर्वेसंहननोपेताःसर्वेपरिघबाहवः सर्वेमायाशतधराःसर्वेतेकामरूपिणः ५७ सर्वेसमर
मासाद्यनश्रूयंतेपराजिताः सर्वेसत्यव्रतपराःसर्वेकामविहारिणः ५८ सर्वेवेदव्रतपराःसर्वेचैवबहुश्रुताः सर्वेसंमतमै
श्वर्यमीश्वराःप्रतिपेदिरे ५९ नचैश्वर्यमदस्तेषांभूतपूर्वोमहात्मनां सर्वेयथार्हदातारःसर्वेविगतमत्सराः ६० सर्वेस
र्वेषुभूतेषुयथावत्प्रतिपेदिरे सर्वेदाक्षायणीपुत्राःप्राजापत्यामहाबलाः ६१ ज्वलंतःप्रतपंतश्चकालेनप्रतिसंहृताः
त्वंचैवेमांयदाभुक्त्वापृथिवींत्यक्ष्यसेपुनः ६२ नशक्ष्यसितदाशक्रनियंतुंशोकमात्मनः मुंचेच्छांकामभोगेषुमुंचेमंश्रीभवंम
दं ६३ एवंस्वराज्यनाशेत्वंशोकंसंप्रसहिष्यसि शोककालेशुचोमात्वंहर्षकालेचमाहृषः ६४ अतीतानागतेहित्वाप्रत्यु
त्पन्नेनवर्त्तय मांचेदभ्यागतःकालःसदायुक्तमतंद्रितः ६५ क्षमस्वनचिरादिंद्रत्वामप्युपगमिष्यति त्रासयन्निवदेवेंद्रवाग्भि

राम० १६८

त्वंक्षिपसिमामिह ६६ संपन्नमपिचात्मानंबहुमन्यसे कालःप्रथममायान्मांपश्चात्त्वामनुधावति ६७ तेनगर्जसिदेवेंद्र
पूर्वकालहितेमपि कोहिस्यात्त्वमलंलोकेनमक्रुद्धस्मसंयुगे ६८ कालस्तुबलवान्प्राप्तस्तेनतिष्ठसिवासव यन्नहर्षसहस्रा
तंपूर्णंभवितुमर्हति ६९ यथाप्रेमसर्वगात्राणिनस्वस्थानिमहौजसः अहमैंद्राच्च्युतःस्थानात्त्वमिंद्रःप्रकृतोदिवि ७० सु
चित्रेजीवलोकेस्मिन्नुपास्यःकालपर्ययात् किंहिकृत्वात्वमिंद्रोद्यकिंवाकृत्वावयंच्युताः ७१ कालःकर्त्ताविकर्त्ताच
सर्वमन्यदकारणं नाशंविनाशमैश्वर्यंसुखंदुःखंभवाभवौ ७२ विद्वान्प्राप्यैवमत्यर्थंनप्रहृष्येन्नचव्यथेत् त्वमेवहींद्र
वेत्थास्मान्वेदाहंत्वांचवासव ७३ किंकत्थसेमांकिंचत्वंकालेननिरपत्रप त्वमेवहिपुरावेत्थयत्तदापौरुषंमम ७४
समरेषुचविक्रांतंपर्याप्तंतन्निदर्शनं आदित्याश्चैवरुद्राश्चसाध्याश्चवसुभिःसह ७५ मयाविनिर्जिताःपूर्वंमरुतश्च
शचीपते त्वमेवशक्रजानासिदेवासुरसमागमे ७६ समेताविबुधाभग्नास्तरसासमरेमया पर्वताश्चासकृत्क्षिप्ताःस
वनाःसवनौकसः ७७ सटंकशिखराभग्नाःसमरेमूर्ध्निमया किंतुशक्यंमयाकर्तुंकालोहिदुरतिक्रमः ७८ नहित्वांनो
त्सहेहंतुंसवज्रमपिमुष्टिना नतुविक्रमकालोयंक्षमाकालोयमागतः ७९ तेनत्वांमर्षयेशक्रदुर्मर्षणतरस्त्वया त्वंमांपरि

मो० एतेकालेपरीतंकालवह्निना। [illegible] ८० निपतंकालपाशेनवंद्धंशक्रविकत्थसे अयंसपुरुषःश्यामोलोकस्यदुरतिक्रमः
१६६ ८१ वध्वातिष्ठतिमांरौद्रःपशुंरशनयायथा लाभालाभौसुखंदुःखंकामक्रोधौभवाभवौ ८२ वधबंधप्रमोक्षश्चसर्वंकालेनलभ्य
168 ते नाहंकर्त्तानकर्त्तात्वंकर्त्तायस्तुसदाप्रभुः ८३ सोयंपचतिकालोमांवृक्षेफलमिवागतं यान्येवपुरुषःकुर्वन्सुखैःकालेनयु
ज्यते ८४ पुनस्तान्येवकुर्वाणोदुःखैःकालेनयुज्यते ८५ नचकालेनकालज्ञःस्पृष्टःशोचितुमर्हति तेनशक्रनशोचामिना
स्तिशोकेसहायता यदाहिशोचतःशोकोव्यसनंनापकर्षति ८६ सामर्थ्यंशोचतोनास्तीत्यतोहंनाद्यशोचिमि एवमुक्तःसहस्रा
क्षोभगवान्पाकशासनः ८७ प्रतिसंहृत्यसंरंभमित्युवाचशतक्रतुः सवज्रमुद्यतंबाहुंदृष्ट्वापाशांश्चवारुणान् ८८ कस्येहनव्य
थेद्बुद्धिर्मृत्योरपिजिघांसतः सातेनव्यथतेबुद्धिरचलातत्वदर्शिनी ८९ ध्रुवंनव्यथसेघत्वंधैर्यात्सत्यपराक्रम कोहिविश्वासमर्थेषु
शरीरेवाशरीरभृत् ९० कर्तुमुत्सहतेलोकेदृष्ट्वासंप्रस्थितंजगत् अहमप्येवमेवैनंलोकंजानाम्यशाश्वतं ९१ कालाग्नावाहितं
घोरेगुह्येसततगेक्षरे नचात्रपरिहारोस्तिकालस्पृष्टस्यकस्यचित् ९२ सूक्ष्माणांमहतांचैवभूतानांपरिपच्यतां अनीशस्याप्रम
त्तस्यभूतानिपचतःसदा ९३ अनिवृत्तस्यकालस्यक्षयंप्राप्तोनमुच्यते अप्रमत्तःप्रमत्तेषुकालोजागर्तिदेहिषु ९४ प्रयत्नेना राम०
प्य १६९

क्रांतोदृष्टपूर्वोनकेनचित् पुराणःशाश्वतोधर्मःसर्वप्राणभृतांसमः ९५ कालोनपरिहार्यश्चनचास्यास्तिव्यतिक्रमः अहोरात्रांश्च
मासांश्चक्षणाःकाष्टालवाःकलाः ९६ सपिंडयतियःकालोवृद्धिंवार्द्धुषिकोयथा इदमद्यकरिष्यामि श्वःकर्तास्मीतिवादिनं॥
९७ कालोहरतिसंप्राप्तोनदीवेगइवद्रुमं इदानींतावदेवासौमयादृष्टःकथंमृतः ९८ इतिकालेनह्रियतांप्रलापःश्रूयतेनृणां नश्यं
त्यर्थास्तथाभोगाःस्थानमैश्वर्यमेवच ९९ जीवितंजीवलोकस्यकालेनागम्यनीयते उच्छ्रायाविनिपातांताभावाभावःसएवच १००
अनित्यमध्रुवंसर्वंव्यवसायोहिदुष्करः सातेनव्यथतेबुद्धिरचलातत्वदर्शिनी १ अहमासंपुराचेतिमनसापिनबुध्यसे कालेनाक्र
म्यलोकेस्मिन्पच्यमानेबलीयसा २ ज्येष्ठ्यंकनिष्ठंचक्षिप्यमाणोनबुध्यते ईर्ष्याभिमानलोभेषुकामक्रोधभयेषुच ३ स्पृहा
मोहाभिमानेषुलोकःसक्तोविमुह्यति भवांस्तुभावतत्वज्ञोविद्वान्ज्ञानतपोन्वितः ४ कालंपश्यतिसुव्यक्तंपाणावामलकंय
था कालचारित्रतत्वज्ञःसर्वशास्त्रविशारदः ५ विरोचनेकृतात्मासिस्पृहणीयोविजानतां सर्वलोकोह्ययंमन्येबुध्यापरिगत
स्त्वया ६ विहरन्सर्वतोमुक्तोनक्वचित्परिसज्जसे रजश्चहितमश्चत्वांस्पृशतोनजितेंद्रियं ७ निःप्रीतिंनष्टसंतापमात्मानंत्वमुपा
ससे सुहृदंसर्वभूतानांनिर्वैरंशांतमानसं ८ दृष्ट्वात्वांममसंजातात्वय्यनुक्रोशिनीमतिः नाहमेतादृशंबुद्धंहंतुमिच्छामिबंधने
९ आनृशंस्यंपरोधर्मोह्यनुक्रोशस्तथैवतेपि मोक्ष्यंतेवारुणाःपाशास्तवेमेकालपर्ययात् १० प्रजानामपचारेणस्वस्तितेस्तुम

११८ त्रिपंचाशत्तमः॥ ॥ पूर्वरूपाणीत्यादिरध्यायः॥ पुनःश्रीकरावश्रीधावरवधर्मानविषातुंप्रवृत्तः १ २ ३ ३ ३

पुत्रश्चपितरंमोहात्प्रेषयिष्यतिकर्मसु ब्राह्मणाः कारयिष्यंतिवृषलाः पादधावनं १२ शूद्राश्चब्राह्मणींभार्यामुपयास्यंति
निर्भयाः वियोनिषुविमोक्ष्यंतिबीजानिपुरुषाधमा १३ संकरंकांस्यभांडैश्चबलिंचैवकुपात्रिकैः चातुर्वर्ण्यपदाक्रान्तममम
यदिंभविष्यति १४ एकैकस्यैतदापाशः क्रमशः परिमोक्ष्यते अस्मत्तस्तेभयंनास्तिसमयंप्रतिपालय सुखीभवनिराबा
धः स्वस्थचेतानिरामयः १५ तमेवमुक्त्वाभगवान्शतक्रतुः प्रतिप्रयातोगजराजवाहनः विजित्यसर्वानसुरान्सुरा
धिपोननंदहर्षेणावभूवचैकराट् १६ महर्षयस्तंतुष्टुवुरंजसाचतंवृषाकपिंसर्वचराचरेश्वरं हिमापहोहव्यमुवाहचाध्वरे
तथामृतंचार्पितमीश्वरोपिहि १७ द्विजोत्तमैः सर्वगतैरभिष्टुतोविदीप्ततेजागतमन्युरीश्वरं प्रशांतचेतामुदितः स्वमा
लयंत्रिविष्टपंप्राप्यमुमोदवासवः ११८ शांतौमोक्षधर्मेषुबलिवासवसंवादः॥ ॥ युधिष्ठिरउवाच पूर्वरूपाणिमेरा
जन्पुरुषस्यभविष्यतः पराभविष्यतश्चैवतन्मेब्रूहिपितामह १ भीष्मउवाच मनएवमनुष्यस्यपूर्वरूपाणिशंसति भवि
ष्यतश्चभद्रंतेतत्पैवनभविष्यतः २ अत्राप्युदाहरंतीममितिहासंपुरातनं श्रियाशक्रस्यसंवादंतन्निबोधयुधिष्ठिर ३ ॥

महतस्तपसो व्युष्ट्या पश्यंल्लोकौ परावरौ सामान्यमृषिभिर्गत्वा ब्रह्मलोकनिवासिभिः ४ ब्रह्मेवामितदीप्तौजाः शांतपाप्मा महातपाः
विचचार यथाकामं त्रिषु लोकेषु नारदः ५ कदाचित्प्रातरुत्थाय पिस्पृक्षुः सलिलं शुचि ध्रुवद्वारभवां गंगां जगामावततार च ६
सहस्रनयनश्चापि वज्री शंवरपाकहा तस्या देवर्षिजुष्टायास्तीरमभ्याजगाम ह ७ तावाप्लुत्य यतात्मानौ कृतजप्यौ समासतुः
नद्याः पुलिनमासाद्य सूक्ष्मकांचनवालुकं ८ पुण्यकर्मभिराख्याता देवर्षिकथिताः कथाः चक्रतुस्तौ तथासीनौ महर्षिकथि
तास्तथा ९ पूर्ववृत्तव्यपेतानि कथयंतौ समाहितौ अथ भास्करमुद्यंतं रश्मिजालपुरस्कृतं १० पूर्णमंडलमालोक्य तावुत्था
योपतस्थतुः अभितस्तूदयंतं तमर्कमर्कमिवापरं ११ आकाशे ददृशे ज्योतिरुद्यतार्चिःसमप्रभं तयोः समीपं संप्राप्तं प्रत्यदृ
श्यत भारत १२ तत्सुपर्णार्कचरितमास्थितं वैष्णवं पदं भाभिरप्रतिमं भाति त्रैलोक्यमवभासयन् १३ तत्राभिरूपशोभाभिरप्सरो
भिः पुरस्कृतां वृहतीमंशुमत्प्रख्यां वृहद्भानोरिवार्चिषं १४ नक्षत्रकल्पाभरणां तां मौक्तिकसमस्रजं श्रियं ददृशतुः पद्मां
साक्षात्पद्मदलास्थितां १५ सावरुह्य विमानाग्र्यादंगनानामनुत्तमा अभ्यागच्छत्त्रिलोकेशं देवर्षिं चापि नारदं १५ नार
दानुगतः साक्षान्मघवांस्तामुपागमत् कृतांजलिपुटो देवीं निवेद्यात्मानमात्मना १६ चक्रे चानुपमां पूजां तस्याश्चापि स सर्व
वित् देवराजः श्रियं राजन्वाक्यं चेदमुवाच ह १७ शक्र उवाच कात्वं केन च कार्येण संप्राप्ता चारुहासिनि कुतश्चागम्यते सु

मो० १७१ श्रीरुवाच पुराणेषु त्रिषु लोकेषु सर्वे स्थावरजंगमाः ममात्मभावमिछंतोपतंते परमात्मना १९ साहं वै पंकजे जाता सूर्यरश्मिविबोधिते
भूत्यर्थं सर्वभूतानां पद्मा श्रीः पद्ममालिनी २० अहं लक्ष्मीरहं भूतिः श्रीश्चाहं बलसूदन अहं श्रद्धा च मेधा च संनतिर्विजितिः स्थितिः
२१ अहं धृतिरहं सिद्धिरहं त्वद्भूतिरेव च अहं स्वाहा स्वधा चैव संनतिर्नियतिः स्मृतिः २२ राज्ञां विजयमानानां सेनाग्रेषु ध्वजेषु च निवा
171 से धर्मशीलानां विषयेषु पुरेषु च २३ जितकाशिनि शूरे च संग्रामेष्वनिवर्तिनि निवसामि मनुष्येंद्रे सदैव बलसूदन २४ धर्मनित्येषु म
हाबुद्धौ ब्रह्मण्ये सत्यवादिनि प्रश्रिते दानशीले च सदैव निवसाम्यहं २५ असुरेष्ववसं पूर्वं सत्यधर्मनिबंधना विपरीतांस्तु तान् बुध्वा
त्वयि वासमरोचयं २६ शक्र उवाच कथंवृत्तेषु दैत्येषु त्वमवात्सीर्वरानने दृष्ट्वा च किमिहागास्त्वं हित्वा दैतेयदानवान् २७ श्रीरुवा
च स्वधर्ममनुतिष्ठत्सु धैर्याद् चलितेषु च स्वर्गमार्गाभिरामेषु सत्वेषु निरताह्यहं २८ दानाध्ययनयज्ञेज्यापितृदैवतपूजनं गुरूणाम
तिथीनां च तेषां सत्यमवर्त्तत २९ सुसंमृष्टगृहाश्चासन् जितस्त्रीका हुताग्नयः गुरुशुश्रूषका दांता ब्रह्मण्याः सत्यवादिनः ३०
श्रद्दधाना जितक्रोधा दानशीलानसूयवः भृतपुत्रा भृतामात्या भृतदारा ह्यनीर्षवः ३१ अमर्षेणा न चान्योन्यं स्पृहयंते कदाचन ॥
न च ज्ञातूपतप्यंति धीराः परसमृद्धिभिः ३२ दातारः संगृहीतारश्चार्याः करुणवेदिनः महाप्रसादा ऋजवो दृढभक्ता जितेंद्रियाः
३३ संतुष्टभृत्यसचिवाः कृतज्ञाः प्रियवादिनः यथार्हमानार्थकरा ह्रीनिषेवा यतव्रताः ३४ नित्यं पर्वसु सुस्नाताः स्वनुलिप्ताः स्वलंकृ शां० १७१

ताः उपवासतपःशीलाः प्रतीता ब्रह्मवादिनः ३५ नैनानभ्युदियात्सूर्यो न चाप्यासन्प्रगेशयाः रात्रौ दधि च सक्तूंश्च नित्यमेव
व्यवर्जयन् ३६ कल्यं घृतं चान्ववेक्षन्प्रयता ब्रह्मवादिनः मंगल्यान्यपि चापश्यन्ब्राह्मणांश्चाप्यपूजयन् ३७ सदा हि वदतां
धर्मं सदा चाप्रतिगृह्णतां अर्द्धं च रात्र्याः स्वपतां दिवा चास्वपतां तथा ३८ कृपणानाथवृद्धानां दुर्बलातुरयोषितां दयां च संविभा
गं च नित्यमेवान्वमोदतां ३९ त्रस्तं विषण्णमुद्विग्नं भयार्त्तं व्याधितं कृशं हृतस्वं व्यसनार्त्तं च नित्यमाश्वासयंति ते ४० धर्ममेवा
न्ववर्त्तन्त न हिंसंति परस्परं अनुकूलाश्च कार्येषु गुरुवृद्धोपसेविनः ४१ पितृन्देवातिथींश्चैव यथावत्तेभ्यपूजयन् अवशेषा
णि चाश्नंति नित्यं सत्यतपोधृताः ४२ नैके श्नंति सुसंपन्नं न गच्छंति परस्त्रियं सर्वभूतेष्ववर्त्तंत यथात्मनि दयां प्रति ४३ नै
वाकाशे न पशुषु वियोनौ न च पर्वसु इंद्रियस्य विसर्गं ते रोचयंति कदाचन ४४ नित्यं दानं तथा दाक्ष्यमार्जवं चैव नित्यदा उत्सा
हो थानहंकारः परमं सौहृदं क्षमा ४५ सत्यं दानं तपः शौचं कारुण्यं वागनिष्ठुरा मित्रेषु चानभिद्रोहः सर्वं तेष्वभवत्प्रभो ४६
निद्रा तंद्रीरसंप्रीतिरसूया चानवेक्षिता अरतिश्च विषादश्च स्पृहा चाप्यविशन्न तान् ४७ साहमेवं गुणेष्वेव दानवेष्ववसं पुरा
प्रजासर्गमुपादाय नैकं युगविपर्यये ४८ ततः कालविपर्यासे तेषां गुणविपर्ययात् अपश्यन्निर्गतं धर्मं कामक्रोधवशात्म
नां ४९ सभासदां च वृद्धानां सतां कथयतां कथाः प्राहसन्नभ्यसूयंश्च सर्ववृद्धान्गुणावराः ५० युवानश्च समासीना वृ

वंम १

मो॰ ह्वानभिगतान्सतः नाभ्युत्थायानाभिवाद्याभ्यां यथापूर्वं जयन ५१ वर्त्तयन्त्येव पितरि पुत्रः प्रभवते तथा अभृत्याभृत्यतां प्राप्य ख्यापयंत्यन
१७२ पत्रपाः ५२ तथा धर्माद्पेतेन कर्मणा गर्हितेन ये महतः प्राप्नुवंत्यर्थानेतेषांतत्राभवत्स्पृहा ५३ उच्चैश्चाप्यवदन्रात्रौ नीचैस्तत्राग्निरज्व
172 लत् पुत्राः पितॄनत्यचरन्नार्यश्चात्यचरन्पतीन् ५४ मातरं पितरं वृद्धमाचार्यमतिथिं गुरुं गुरुत्वान्नाभ्यनंदंत कुमारान्नान्वपालय
न् ५५ भिक्षां बलिमदत्वा च स्वयमन्नानि भुंजते अनिष्ट्वा संविभज्याथ पितृदेवातिथीन्गुरून् ५६ न शौचमनुरुध्यंत तेषां सूदज
नास्तथा मनसा कर्मणा वाचा भक्ष्यमासीदनावृतं ५७ विप्रकीर्णानि धान्यानि काकमूषिकभोजनं अपावृतं पयोतिष्ठदुच्छिष्टाश्चा
स्पृशन्घृतं ५८ कुद्दालं दात्रपिटकं प्रकीर्णं कांस्यभाजनं द्रव्योपकरणं सर्वं नान्ववैक्षत्कुटुंबिनी ५९ प्राकारागारविध्वंसान्न
स्मा ते प्रतिकुर्वंते नाद्रियंते यमूनवध्यायवसेनोदकेन च ६० बालानां प्रेक्षमाणानां स्वयं भक्ष्यमभक्षयन् तथा भृत्यजनं सर्वमसंतर्प्य
च दानवाः ६१ पायसं कृसरं मांसमपूपानथ शष्कुलीः अपाचयन्नात्मनोर्थे वृथामांसान्यभक्षयन् ६२ उत्सूर्यशायिनश्चासन्सर्वे
चासन्प्रगेनिशाः अवर्त्तन्कलहाश्चात्र दिवारात्रं गृहेगृहे ६३ अनार्याश्चार्यमासीनं पर्युपासन्न तत्र ह आश्रमस्थान्विधर्मस्था
प्राद्विषंत परस्परं ६४ संकराश्चाभ्यवर्त्तंत न च शौचमवर्त्तत ये च वेदविदो विप्रा विस्पष्टमनृचश्च ये ॥ निरंतरविशेषास्ते बहुमाना
वमानयोः हारमाभरणं वेषं गतं स्थितमवेक्षितं ६६ असेवंत भुजिष्या वै दुर्जनाचरितं विधिं स्त्रियः ॥ ॥ ७ ॥ ॥ राम॰
१७२

पुरुषवेषेण पुंसः स्त्रीवेषधारिणः ६७ क्रीडारतिविहारेषु परां मुदमवाप्नुवन् प्रभवद्भिः पुरा दायानर्हेभ्यः प्रतिपादितान् ६८ नाभ्यव
नंदंत नास्तिक्याद्वनंतः संभवेष्वपि मित्रेणाभ्यर्थितं मित्रमर्थे संशयिते क्वचित् ६९ वालकोधगमात्रेण स्वार्थेनाघ्नततद्वसु परस्वादान
रुचयो विपणाव्यवहारिणः ७० अहृष्टपंक्तार्यवर्णेषु शूद्राश्चापि तपोधनाः अधीयंते व्रताः केचिद्वृथाव्रतमथापरे ७१ अशुश्रूषुर्गुरोः शि
ष्यः कश्चिच्छिष्यसखो गुरुः पिता चैव जनित्री च श्रांतौ वृत्तोत्सवाविव ७२ अप्रभुत्वे स्थितौ वृद्धावन्नं प्रार्थयतः सुतान् तत्र वेदविदः प्रा
ज्ञा गांभीर्ये सागरोपमाः ७३ तृष्णादिष्वभवन्सक्ताः मूर्खाः श्राद्धान्नभुंजत प्रातःप्रातश्च सुप्रश्नं कल्पनं प्रेषणं क्रियाः ७४ शिष्यानमहि
तास्तेषामकुर्वन्गुरवः स्वयं श्वश्रूश्वशुरयोरग्रे वधूः प्रेष्यानशासत ७५ अन्वशासच्च भर्तॄंस्ताः समाहूयाभिजल्पती प्रयत्नेनापि चारक्ष
द्वित्तं पुत्रस्य वै पिता ७६ विभज्य चापि संरंभात् दुःखवासं तथावसत् अग्निदाहेन चौरैर्वा राजभिर्वा हृतधनं ७७ दृष्ट्वा द्वेषात्प्रहसंत सुहृत्सं
भाविताश्चापि कृतघ्ना नास्तिकाः पापा गुरुदाराभिमर्षिणः ७८ अभक्ष्यभक्षणरता निर्मर्यादा हतत्विषः तेष्वेवमादीनाचारानाचरत्सु
विपर्यये ७९ नाहं दैत्येंद्र वत्स्यामि दानवेष्विति मे मतिः तन्मां स्वयमनुप्राप्तामभिनंद शचीपते ८० त्वयार्चितां मां देवेश पुरो धास्यंति देव
ताः यत्राहं तत्र मत्कांता मद्विशिष्टा मदर्पणाः ८१ सप्त देव्यो जयाद्यष्टमो वासमेष्यंति तेऽष्टधा आशा श्रद्धा धृतिः क्षांतिर्विजितिः संनतिः
क्षमा ८२ अष्टमी वृत्तिरेतासां पुरोगा पाकशासन ताश्चाहं चासुरांस्त्यक्त्वा युष्मद्विषयमागता ८३ त्रिदशेषु निवत्स्यामि धर्मनिष्ठां

मो० तदात्मसु इत्युक्तवचनांदेवींप्रीत्यर्थंचननंदतुः ८४ नारदश्चात्रदेवर्षिर्वृत्रहंताचवासवः ततोनलसखोवायुःप्रववौदेववेश्मसु
१७३ ८५ इष्टगंधःसुखस्पर्शःसर्वेंद्रियसुखावहः शुचौचाभ्यर्चितेदेशेत्रिदशाःप्रायशःस्थिताः लक्ष्मीसहितमासीनंमघवंतंदिदृक्षवः
ततोदिवंप्राप्यसहस्रलोचनःश्रियोपपन्नःसुहृदामहर्षिणा रथेनहर्यश्वयुजासुरर्षभःसदःसुराणामभिसत्कृतोययौ ८८ अथें
173 गितंवज्रधरस्यनारदःश्रियाश्चदेव्यामनसाविचारयन् श्रियेशशंसामरदृष्टपौरुषःशिवेनतत्रागमनंमहर्षिभिः ८९ ततोमृतंद्यौः
प्रववर्षभास्वतीपितामहस्यायतनेस्वयंभुवः अनाहतादुंदुभयोथनेदिरेतथाप्रसन्नाश्चदिशश्चकाशिरे ९० यथर्तुसस्येषुववर्ष
वासवोनधर्ममार्गाद्विचचालकश्चन अनेकरत्नाकरभूषणाचभूःसुघोषघोषाभुवनौकसांजये ९१ क्रियाभिरामामनुजामनस्वि
नोबभुःशुभेपुण्यकृतांपथिस्थिताः नरामराःकिंनरयक्षराक्षसाःसमृद्धिमंतःसुमनस्विनोभवन् ९२ नजात्वकालेकुसुमंकुतःफ
लंपपातवृक्षात्पवनेरितादपि रसप्रदाःकामदुहश्चधेनवोनदारुणावाग्विचचारकस्यचित् ९३ इमांसपर्यांसहसर्वकामदैःश्रि
याश्चशक्रप्रमुखैश्चदैवतैः पठंतियेविप्रसदःसमागताःसमृद्धकामाःश्रियमाप्नुवंतिते ९४ त्वयाकुरूणांवरयत्प्रचोदितंभवाभव
स्यहपरंनिदर्शनं तदद्यसर्वंपरिकीर्तितंमयापरीक्ष्यतत्त्वंपरिगंतुमर्हसि ९५ शांतौमोक्षधर्मेषुश्रीवासवसंवादः॥ ॥ युधिष्ठिरउवाच
किंशीलःकिंसमाचारःकिंविद्यःकिंपराक्रमः प्राप्नोतिब्रह्मणःस्थानंयत्परंप्रकृतेर्ध्रुवं ॥ ॥ ॥ ॥ ॥ ॥ राम० १७३

वं १ भीष्मउवाच मोक्षधर्मेषु निपतो लघ्वाहारो जितेंद्रियः प्राप्नोति ब्रह्मणः स्थानं तत्परं प्रकृतेर्ध्रुवं २ अत्राप्युदाहरंतीममिति
हासं पुरातनं जैगीषव्यं महाप्रज्ञं धर्माणामागतागमं अक्रुध्यंतमहृष्यंतमसितो देवलोब्रवीत् ३ देवलउवाच नप्रीयसे वंद्यमा
नो निंद्यमानो न कुप्यसे कातेप्रज्ञा कुतश्चैवा किंतेतस्याः परायणं ४ भीष्मउवाच इतितेनानुयुक्तः सतमुवाच महातपाः मह
द्वाक्यमसंदिग्धं पुष्कलार्थपदं शुचि ५ जैगीषव्यउवाच यागतिर्यापराकाष्ठा याशांतिः पुण्यकर्मणां तांतेहं संप्रवक्ष्यामि महतीमृषि सं ४
सत्तम ६ निंदत्सु च समानित्यं प्रशंसत्सु च देवले निह्नुवंति च येतेषां समयं सुकृतं च यत् ७ उक्ताश्च न वदिष्यंति वक्तारमहिते
हितं प्रतिहंतुं न चेच्छंति हंतारं वै मनीषिणः ८ नाप्राप्तमनुशोचंति प्राप्तकालानुकुर्वते नचातीतानि शोचंति नचैव प्रतिजानते ९
संप्राप्तायां च पूजायां कामादर्थेषु देवल यथोपपत्तिं कुर्वंति शक्तिमंतः कृतव्रताः १० पक्वविद्या महाप्रज्ञा जितक्रोधा जितेंद्रि
याः मनसा कर्मणा वाचा नापराध्यंति कर्हिचित् ११ अनीर्षवो न चान्योन्यं विहिंसंति कदाचन नच जातूपतप्यंते धीराः परसमृ
द्धिभिः १२ निंदाप्रशंसे चात्यर्थं न वदंति परस्य ये नच निंदाप्रशंसाभ्यां विक्रियंते कदाचन १३ सर्वतश्च प्रशांता ये सर्वभूतहिते
रताः नक्रुध्यंति न हृष्यंति नापराध्यंति कर्हिचित् १४ विमुच्य हृदयग्रंथिं चंक्रमंति यथासुखं नयेषां बांधवाः संति येचान्येषां नबां
धवाः १५ अमित्राश्च न संत्येषां येचामित्रा न कस्यचित् यएवं कुर्वते मर्त्याः सुखं जीवंति सर्वदा १६ येधर्मं चानुरुध्यंते धर्मज्ञा द्वि
जसत्तम

मो०
१७४
१७५
१७६

174
176
175

येह्यतोविच्युतामार्गान्निहृष्यंत्युद्विजंतिच १७ आस्थितस्तमहंमार्गमसूयिष्यामिकंकथं निंद्यमानःप्रशस्तोवाहृष्येहंकेनहेतुना १८ य
थदिच्छंतितत्तस्मादभिगच्छंतुमानवाः नमेनिंदाप्रशंसाभ्यांह्रासवृद्धीभविष्यतः १९ अमृतस्येवसंतृप्येदवमानस्यतत्त्ववित् विषस्ये
वोद्विजेन्नित्यंसंमानस्यविचक्षणः २० अवज्ञातःसुखंशेतेइहचामुत्रचाभयं विमुक्तःसर्वदोषेभ्योयोवमंतास्यबध्यते २१ परांगतिंचये
केचित्प्रार्थयंतिमनीषिणः एतद्व्रतंसमाहृत्यसुखमेधंतितेजनाः २२ सर्वतश्चसमाहृत्यक्रतून्सर्वान्जितेंद्रियः प्राप्नोतिब्रह्मणःस्था
नंयत्परंप्रकृतेर्ध्रुवं २३ नास्यदेवानगंधर्वानपिशाचानराक्षसाः पदमन्ववरोहंतिप्राप्तस्यपरमांगतिं २४ इतिमहाभारतेशांतौमो
क्षधर्मेषुजैगीषव्यासितसंवादः ॥ ॥ युधिष्ठिरउवाच प्रियःसर्वस्यलोकस्यसर्वसत्वाभिनंदिता गुणैःसर्वैरुपेतश्चकोन्वस्तिभुवि
मानवः १ भीष्मउवाच अत्रतेवर्त्तयिष्यामिपृच्छतोभरतर्षभ उग्रसेनस्यसंवादंनारदेकेशवस्यच २ उग्रसेनउवाच यस्यसं
कल्पतेलोकोनारदस्यप्रकीर्त्तने मन्येसगुणसंपन्नोब्रूहितन्ममपृच्छतः ३ वासुदेवउवाच कुकुराधिपयान्मन्येशृणुतान्मेविव
क्षतः नारदस्यगुणान्साधून्संक्षेपेणनराधिप ४ नचारित्रनिमित्तोस्याहंकारोदेहतापनः अभिन्नश्रुतचारित्रस्तस्मात्सर्वत्रपू
जितः ५ अरतिःक्रोधचापल्येभयंनैतानिनारदे अदीर्घसूत्रःशूरश्चतस्मात्सर्वत्रपूजितः ६ उपास्योनारदोवाढंवाचिनास्यव्यतिक्र

राम०
१७४
१७५
१७६

मः कामतोयदिवालोभात्तस्मात्सर्वत्रपूजितः ८ अध्यात्मविधितत्त्वज्ञः क्षांतशक्तोजितेंद्रियः ऋजुश्चसत्यवादीचतस्मात्स
र्वत्रपूजितः तेजसायशसाबुध्याज्ञानेनविनयेनच जन्मनातपसावृद्धस्तस्मात्सर्वत्रपूजितः ९ सुशीलःसुखसंवेशःसुभोजः
स्वादरःशुचिः सुवाक्यश्चाप्यनीर्ष्यश्चतस्मात्सर्वत्रपूजितः १० कल्याणंकुरुतेवाढंपापमस्मिन्नविद्यते नप्रीयतेपरानर्थैस्त
स्मात्सर्वत्रपूजितः ११ वेदश्रुतिभिराख्यानैरर्थानभिजिगीषति तितिक्षुरनवज्ञातस्तस्मात्सर्वत्रपूजितः १२ समत्वाच्चप्रियोना
स्तिनाप्रियश्चकथंचन मनोनुकूलवादीचतस्मात्सर्वत्रपूजितः १३ बहुश्रुतश्चित्रकथःपंडितोलालसोऽशठः अदीनो
ऽक्रोधनोऽलुब्धस्तस्मात्सर्वत्रपूजितः १४ नार्थेधनेवाकामेवाभूतपूर्वोस्यविग्रहः दोषाश्चास्यसमुच्छिन्नास्तस्मात्सर्वत्रपू
जितः १५ दृढभक्तिरनिंद्यात्माश्रुतवाननृशंसवान् वीतसंमोहदोषश्चतस्मात्सर्वत्रपूजितः १६ असक्तःसर्वसंगेषुसक्ता
त्मेवचलक्ष्यते अदीर्घसंशयोवाग्मीतस्मात्सर्वत्रपूजितः १७ समाधिर्नास्यकामार्थेनात्मानंस्तौतिकर्हिचित् अनीर्ष्युर्मृदुसंवा
दस्तस्मात्सर्वत्रपूजितः १८ लोकस्यविविधंचित्तंप्रेक्षतेचाप्यकुत्सयन् संवर्गविद्याकुशलस्तस्मात्सर्वत्रपूजितः १९ नासूयत्या
गमंकंचित्स्वनयेनोपजीवति अवंध्यकालोवश्यात्मातस्मात्सर्वत्रपूजितः २० कृतश्रमःकृतप्रज्ञोनचतृप्तःसमाधितः नियतयु
क्तोऽप्रमत्तश्चतस्मात्सर्वत्रपूजितः २१ नापत्रपश्चयुक्तश्चनियुक्तःश्रेयसेपरैः अभेत्तापरगुह्यानांतस्मात्सर्वत्रपूजितः २२ नहृ
ष्यत्यर्थलाभेषुनालाभेतुव्यथत्यपि स्थिरबुद्धिरसक्तात्मातस्मात्सर्वत्रपूजितः मनामयंकालज्ञंचप्रियज्ञंचकःप्रियंनकरिष्यति
२४ शांतिमोक्षधर्मेषुवासुदेवोग्रसेनसंवादः ॥ ॥

नंबर ४ गुणसंपन्न दस्तु पु चि २

मो° १७७ सर्वं नानाख्यानमुखेनोक्तं अधिकारिणः स्वरूपं उक्त्वात्मनि तत्त्वज्ञानाधिकारं प्रश्नपूर्वकं भृगुभरद्वाजसंवादादौ पूर्वं संक्षेपेणोक्तमेवार्थं विस्तरेण श्रो-
तुमिच्छन् युधिष्ठिर उवाच। आद्यंतमिति आदिं संसारहेतुं अंतं लयस्थानं भूतानां जीवानां अभिन्ननिमित्तोपादानत्वसूचनार्थः समासः साक्षाच्चामपा
ज्ञानाज्ञानदात्मानं स्वयमकुर्वंतीति न्यायेन उक्ता च ब्रह्मणः तथात्वप्रतिपादनात् किंलक्षणं ब्रह्मेति ध्यानकर्मणी तत्प्राप्तौ अंतरंगबहिरंगसाधने कालं कलिः
शयानो भवति संजिहानस्तु द्वापरः उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरन्निति श्रुतिप्रसिद्धं चतुर्विधं जीवस्थानं गतिं प्रवेशस्थानं मूर्धानाभिमिव तंतुजालस्य तं

177

युधिष्ठिर उवाच आद्यंतं सर्वभूतानां ज्ञातुमिच्छामि कौरव ध्यानं कर्म च कालं च तथैवायुर्युगे युगे १ लोकतत्त्वं
च कार्त्स्न्येन भूतानामागतिं गतिं सर्गश्च निधनं चैव कुत एतत्प्रवर्त्तते २ यदि तेऽनुग्रहे बुद्धिरस्मास्विह सतां वर
एतद्भवंतं पृच्छामि तद्भवान्प्रब्रवीतु मे ३ पूर्वं हि कथितं श्रुत्वा भृगुभाषितमुत्तमं भरद्वाजस्य विप्रर्षेस्ततो मे
बुद्धिरुत्तमा ४ ॥ ॥ ॥ ॥ ॥

देतत्सर्वं ज्ञातुमिच्छामि लोकतत्त्वं लोकस्य वास्तवं रूपं भूतानां वियदादीनां चागतिं उद्गमं क्रतस्य पर्सकशयानः अविद्यावृतः पुमान्कलिरित्युच्यते संजिहानः
विषयेषु जातवैराग्यः सन् अविद्यां समकृहातुमिच्छन् मुमुक्षुर्द्वापर इत्युच्यते उत्तिष्ठन् शमाद्यनुष्ठानाय सज्जीभवन् त्रेतेत्युच्यते चरन् शमादिकमाच
रन् कृतं कृतयुगं भवतिसमाने वेत्यर्थः। धर्मतारतम्याच्चायुस्तारतम्यं युगे युगे प्रसिद्धं १ सर्गनिधने भौतिकानां जरायुजादीनां चतुर्मुखादिरवांतरका
रणानामपि किं ब्रह्मैव तत्तोन्यद्वेत्यभिप्रायः ३ पौनरुक्त्यशंकामाह पूर्वं हीति ४ राम° १७७

म१

परमधर्मिष्ठा योगधर्मनिष्ठा बुद्धिर्मे जातेति पूर्वेणान्वयः दिव्यसंस्थानसंस्थिता। अलौकिकस्वरूपनिष्ठावती। मृत्योरधिकं विस्तरेणार्थमर्थः तथा च संक्षेप
णाश्रुतस्यापि विस्तरार्थं पुनः प्रश्न इत्यपौनरुक्त्यं ७ संदेहं संदेहविषयं प्रश्नसमूहं। छिन्नधर्मार्थसंशयं व्यासं ८ तत्त्वपदार्थौ पृच्छतीत्यत्रेतिक
र्तारमीश्वरमेव संतं कालस्य पूर्वोदाहृतश्रुत्युक्तस्य शयानसंज्ञितहानोत्तिष्ठत्संचरद्रूपवतो जीवस्य ज्ञानेन नश्यानत्वादिधर्मज्ञानेन निष्ठां अर्थं त

ज्ञाता परमधर्मिष्ठा दिव्यसंस्थानसंस्थिता ततोऽहं परिपृच्छामि तद्भवान्वक्तुमर्हति ५ भीष्म उवाच अत्रतेव
र्तेऽपि ऐषमहमितिहासं पुरातनं जगौ यद्भगवान्व्यासः पुत्राय परिपृच्छते ६ अधीत्य वेदानखिलान्सांगोपनिषद
स्तथा अन्विच्छन्नैष्ठिकं कर्म धर्मनैपुण्यदर्शनात् ७ कृष्णद्वैपायनं व्यासं पुत्रो वैयासकिः शुकः पप्रच्छ संदेह
मिमं छिन्नधर्मार्थसंशयं ८ शुक उवाच भूतग्रामस्य कर्तारं कालज्ञानेन निश्चितं ब्राह्मणस्य च यत्कृत्यं तद्भ
वान्वक्तुमर्हति ९ भीष्म उवाच तस्मै प्रोवाच तत्सर्वं पिता पुत्राय पृच्छते अतीतानागते विद्वान्सर्वज्ञः सर्वधर्मवित् १०

मन्वादिरूपं प्राप्तिः संजाताः स्यात्तकालज्ञानेन निश्चितं ईशोऽपि अविद्यया जीवतां गतः केन धर्मेण कीदृशं भावमनुष्ठा इति प्रश्नार्थः तत्र मस्या
दिवाकैष्ये तत्प्रसिद्धमेव जीवब्रह्माभेदमनुवदति प्रश्ना कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति अथर्वणोऽएकविज्ञानात्सर्वविज्ञानप्र
सिद्धमनुवादवत् ब्राह्मणानुमुमुक्षुः धर्माधर्माभ्यां मुक्तिमिच्छन् ९ सर्वज्ञः ब्रह्मज्ञः॥ १०

नो २

मो°
१७८ भूतग्रामकर्त्तुः स्वरूपं तावदाहानाद्यन्तमिति। दिव्यं द्योतमानं चिन्मात्रं ब्रह्म त्रिविधपरिच्छेदशून्यं वस्तु अग्रे सृष्टेः प्राक् संभवन्तीति मायाशबलात्तज्जगदा
द्यन्तरूपाद्यवच्छिन्नत्वात् अनाद्यन्तमिति अजं अजरं अव्ययमिति यास्कोक्तान् जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीति षड्भावविकारान्
चितो निषेधति अत एव ध्रुवं अविकारं अप्रतर्क्यं कारणं हि कार्येणानुमीयते न चैतत्तथा तत एवाविज्ञेयं हेत्वन्तरस्याविषयः कथं तर्हि दृश्यते त्वग्र्यया
बुद्ध्येति श्रुतिर्ब्रह्मणो बुद्धिगम्यत्वमाह उच्यते स्वच्छस्य सत्त्वस्य दृश्यत्वे यथा दर्पणद्वारा नेत्रतः एवं ब्रह्मणो धीप्रतिबिंबितस्य धियो दृश्यते नैव

178

व्यास उवाच अनाद्यन्तमजं दिव्यमजरं ध्रुवमव्ययं
अप्रतर्क्यमविज्ञेयं ब्रह्माग्रे संप्रवर्त्तते ॥१॥ ॥

दृश्यत्वेन स्वत इति गृहाण कारणत्वादिकं तु ब्रह्मणः अविद्यकं अविद्यादशायां स्थितेनैव कल्प्यत इत्यर्थः एतच्चाक्षिप्य समाहितं वार्त्तिके नन्वविद्यावदिष्टं
चेद्ब्रह्म दोषो महानयं निरविद्ये च विद्यायाः आनर्थक्यं प्रसज्यते न अस्याविद्यं सविद्यायामेवासिला प्रकल्प्यते ब्रह्मद्वारा त्वविद्येयं न कथंचन युज्यते इति श्रु
तिश्च नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यदिति सृष्टेः प्राग्वस्तु ह त्वमनुरुध्य असत्सद्रजः शब्दितानां आनुमानिकानां शून्य
प्रधानपरमाणूनामिव व्योमतस्य परव्योमशब्दितस्य जगत्कारणस्याप्यसत्त्वमाह तस्माद्युक्तमेव ब्रह्मणि अनाद्यन्तत्वादिविशेषणं ॥१॥ ॥ राम°
१७८

कालस्तेनेनतिश्चितमितिद्वितीयप्रश्नस्योत्तरमाह काष्ठेति अत्रतस्माद्व्यक्तात्मकंमनइत्युपसंहारगता कलाकाष्ठादिव्यंजकंप्रवृत्तंसूर्यादिपदार्थजा
नंतत्सर्वमेनोमात्रमित्यवगंतेः कृतत्रेतादिरूपमपितदेवमुत्यादिगुणतारतम्यात् तथामानुषपैतृकदैवब्राह्मणानामहोरात्राणामुत्तरोत्तरंप्रमाणाधिक्यम
पिसत्वोत्कर्षादेवात्तदपि अस्मदृष्ट्यपेक्षमेवातत्त्वानांतुतदस्मदीयघटीमात्रमेवगणतदेवरैवत्सर्वर्वसराधिनोरैवतकेनब्रह्मलोकस्यनमुहूर्त्तमात्र
त्वेनानुभूतः कालोलौकिकानामनेकसंवत्सरसंमितोव्यतीतइत्युपाख्यानेनव्यक्तीकृतंपुराणेषुतस्मात्त्वन्महत्त्वासेवीपिसुखीस्वल्पायुर्दुः
खी चिरायुःसाधारणाद्दुष्यात्पापिनामल्पमायुःकलिप्राधान्यात्इतरेषांद्वापरादिप्राधान्यादधिकमितिविवेकः तस्मात्कालज्ञपार्थमेनानिग्रहे

काष्ठानिमेषादशपंचचैवत्रिंशत्तुकाष्ठागणयेत्कलांतां त्रिंशत्कलश्चापिभवेन्मुहूर्त्तोभागःकलायादशमश्चयः
स्यात् १२ त्रिंशन्मुहूर्त्तंतुभवेदहश्चरात्रिश्चसंख्यामुनिभिःप्रणीता मासःस्मृतोरात्र्यहनीचत्रिंशत्संवत्सरोद्वा
दशमासउक्तः १३

णान्मैवशरणीकरणीयइत्यध्यायतात्पर्यं अक्षराणिस्फुटानिभागःभगःसूर्यःतत्संबंधीकलायाःदशमोंशःतेनसहितःत्रिंशत्कलाःमुहूर्त्तःसचसूर्यस
उदयादुदयांतरपर्यंतंयावान्कालःतस्यांशोऽष्टांशःपादोनवाडीचतुष्टयात्मकःतस्यापिदशमोंशःसार्द्धद्वाविंशतिपलात्मकःएतेनअष्टादशनिमे
षात्मकाष्ठात्रिंशत्तुताःकला त्रिंशत्कलोमुहूर्त्तस्तैःत्रिंशद्रात्र्यहनीतुतैरित्यादिलोकप्रसिद्धःक्रमःप्रतिमुहूर्त्तंसार्द्धपलाधिकत्वात्स्थूलइतिशे
षंकालात्तुषोडशोभागइत्यमरः अन्येतु ४ काष्ठात्रपाधिकात्रिंशत्कलाःमुहूर्त्तइतिव्याचख्युः १२ १२ ॥ ॥

मो० तावच्छती चतुःशतीं तथाविधः चतुःशतात्मकः कालः संध्यायुगयोरंतरं संध्यांशः युगांतरयोरंतरं २० एतत्कालाख्यं चतुर्युगात्मकं जीवस्वरूपं शाश्वतं आद्यं
१७९ तन्मूलं मनोरूपोपाधियोगाच्चतुर्विधमपि स्वरूपतः सर्वविकारहीनं ब्रह्मैवास्तीत्यर्थः २१ कृते युगे युज्यते वासनावरत्रयाबद्धे तस्मिन् पुरुषपशुरिति युगं स्व

संवत्सरं द्वैत्वयनेवदंति संख्याविदो दक्षिणामुत्तरं च १४ अहोरात्रे विभजते सूर्यो मानुषलौकिके रात्रिः स्वप्ना
य भूतानां चेष्टायै कर्मणामहः १५ पित्र्ये रात्र्यहनी मासः प्रविभागस्तयोः पुनः कृष्णोहः कर्मचेष्टायां शुक्लः स्व
प्नाय शर्वरी १६ दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनं १६ येते रात्र्यह
नी पूर्वं कीर्तिते जीवलौकिके तयोः संख्याय वर्षाग्रे ब्राह्मे वक्ष्यामहः क्षपे १७ एषकस्तु वत्सराग्राणि प्रवक्ष्याम्यनु
पूर्वशः कृतत्रेतायुगे चैव द्वापरे च कलौ तथा १८ चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगं तस्य तावच्छती संध्या
संध्यांशश्च तथाविधः १९ इतरेषु ससंध्येषु संध्यांशेषु ततस्त्रिषु एकपादेन हीयंते सहस्राणि शतानि च २० ए
तानि शाश्वतान् लोकान् धारयंति सनातनान् एतद्ब्रह्मविदां तात विदितं ब्रह्म शाश्वतं २१ चतुष्पात्सकलो धर्मः स
त्यं चैव कृते युगे नाधर्मेणागमः कश्चिन्नरास्तस्य प्रवर्त्तते २२

धर्मस्तस्मिन् कृते साकल्येन निष्पादितो नस्य कृतयुगात्मनः पुरुषस्य अधर्मेणाशेपनाद्यभिचारकर्मणा आगमः उपदेशवाक्यं सच परइति विशेषणात् राम०
वेदस्य वा २२ २२ १७९

ज्ञानमपरविद्या २

चौर्यं च कान्तं च कुत्सितमनृतं वेदविरुद्धं हिंसादिकमितनवैदिकं कर्मायित्रन्ते वाध्योगपत्वादनृतमेवेति दर्शितं मायाशाठ्यादिरूपा उपचीयते वर्द्धते २६ तपः
परिविद्यां तेच अपपरापयातदक्षरमधिगम्यते यत्तददेश्यमग्राह्यमित्यादिना तत्रापरा ऋग्वेदइत्यादिना पर्वरोप्रसिद्ध २७ एतामिति अत्र कृतादिषु चतु

इतरेष्वागमाद्धर्मः पादशस्त्ववरोप्यते चौर्यकानृतमायाभिरधर्मश्चोपचीयते २३ अरोगाः सर्वसिद्धार्थाश्चतुर्वर्ष
शतायुषः कृते त्रेतायुगे त्वेषां पादशो ह्रसते वयः २४ वेदवादाश्चानुयुगं ह्रसन्तीति हि नः श्रुतं आयूंषि चाशि
षश्चैव वेदस्यैव च यत्फलं २५ अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे अन्ये कलियुगे नॄणां युगह्रासानुरूपतः
२६ तपः परं कृतयुगे त्रेतायां ज्ञानमुत्तमं द्वापरे यज्ञमेवाहुर्दानमेव कलौ युगे २७ एतां द्वादशसाहस्रीं यु
गाख्यां कवयो विदुः सहस्रपरिवर्तं तद्ब्राह्मं दिवसमुच्यते २८ रात्रिमेतावतीं चैव तदादौ विश्वमीश्वरः प्रलये
ध्यानमाविश्य सुप्त्वा पान्ते विबुध्यते २९

स्त्रिधैकक्रमेणाधर्मस्य दशपादः अधर्मस्य षट् एतेषामपि युगकालाल्पत्वबहुत्वाभ्यां फलतश्चतुर्युगं पादमात्रं अधर्मः पादत्रयं धर्मः सपंसह
स्रगुणितं ब्राह्मं दिनं तावन्त्येव ब्राह्मी रात्रिश्चेति वदता अपयत्रान्यनश्यति तदलं तन्मर्त्यमिति श्रुतेर्ब्रह्मपदमपि दिवा हेतदुःखनरात्रो अस्ता नश
षेणाचानुविद्धत्वात् क्षयिष्णुत्वाच्च क्षुद्रमेवेति दर्शितं २८ तदादौ दिनादौ ध्यानमाविश्य योगनिद्रया सुप्त्वा नतिंद्रियाणां ज्ञानेन २९

मो॰ १८० इममेवसृष्टिप्रलयप्रकारमस्मदादिष्वपिअतिदिशति प्रतिबुद्धइति अक्षप्यंक्षेप्तुमशक्यं स्वतोनिर्विकारस्वरूपमपिब्रह्माजीवः क्षेपाक्षेपेनिद्रा
नाशेसतिप्रतिबुद्धः सन्विकुरुतेमाययाविकारयुक्तंकरोति चकारोहेत्वर्थः यस्मात्महद्भूतं अहंकारंसृजतेतस्मादहंकारात्तत्वात्मकंकोवि
पदाद्यात्मकंमनश्चसृजतेतामनोमात्रमेवकालाकाशादिकंसुप्तिप्रबोधाववचसृष्टिप्रलयाविसर्गः तथाचश्रुतिः सयदास्वपितितदैनंवाक्स

180

सहस्रयुगपर्यंतमहर्यद्ब्रह्मणोविदुः रात्रिंयुगसहस्रांतांतेहोरात्र
विदोजनाः ३० प्रतिबुद्धोविकुरुतेब्रह्माक्षय्यंक्षपाक्षये सृजतेच
महद्भूतंतस्माद्व्यक्तात्मकंमनः ३१ शांतौमोक्षधर्मेषुमुक्तानुप्रश्ने॥ ॥

वैर्नामभिः सहाप्येतिचक्षुः सर्वैरूपैः सहाप्येतीत्यादिनासुषुप्तौप्रत्यगात्मनिनामरूपप्रपंचप्रलयमुक्त्वाऽथयदाप्रबुध्यतेएतस्मादात्मनः सर्वेप्रा
णायथायतनंविप्रतिष्ठंतेप्राणेभ्योदेवादेवेभ्योलोकाइतिप्रबोधेचततएवप्राणादेवलोकशब्दितानामाध्यात्मिकाधिदैविकाधिलौकिकप्र शां॰ १८०
पंचानामुत्पत्तिंदर्शयति ३१ सप्तपंचाशत्तमः॥

५१

ननुप्राक्सिद्धस्यज्ञाज्ञातस्यज्ञांकंजगतस्समनस्केंद्रियसन्निकर्षात्गृह्यतेघस्तनरवायंघटइतिप्रत्यभिज्ञायतेचतत्कथंमनोमात्रमित्याशंक्याह। ब्रह्मे
तिमनोमहान्मतिर्ब्रह्मापूर्बुद्धिःख्यातिरीश्वरःप्रज्ञासंवित्चितिश्चैवस्मृतिश्चपरिपद्यते पर्यायवाचकाःशब्दामनसःपरिकीर्तिताइतिस्मृतेर्ब्रह्म
महत्तत्वंसूक्ष्मबुद्धिःतच्चतेजोमयंसूक्ष्मवासनामयं। सएतास्तेजोमात्राःसम्पादद्दानइत्यादौवासनासुतेजःशब्दप्रयोगात् तदेवमुक्तेबीजंविद्धी
तिशेषः यस्यबीजस्यएकस्यद्वयांतरवर्जितस्यभूतस्यजनिमतः पंचम्यर्थषष्ठी॥ यस्मादिदंजगतभूतंउभूतंस्थावरंस्थास्नुनित्यंचेतनंजंगमंविना
शिश्रनितंअचेतनंस्वप्नइववासनामयंजगतमनस्येवस्थितंपूर्वसंस्कारवशातइदमितिज्ञायतेतदिदमितिप्रत्यभिज्ञायतेचेत्यर्थः १ अहरिति

व्यासउवाच ब्रह्मतेजोमयंशुक्रंयस्यसर्वमिदंजगत् एकस्यभूतंभूतस्यद्वयंस्थावरजंगमं अहर्मुखेविबुद्धः
सन्सृजतेविद्ययाजगत् अग्रएवमहद्भूतमाशुव्यक्तात्मकंमनः २ अभिभूयहचार्चिष्मान्व्यसृजत्सप्तमा
नसान् दूरगंबहुधागामिप्रार्थनासंशयात्मकं मनःसृष्टिंविकुरुतेचोद्यमानंसिसृक्षया ३ ॥ ॥

ते

अविषयेतिमहत्तत्वस्यापिकारणमुक्तंसृष्टिक्रममाहाग्रेइतिअग्रेसर्गादौमहतमहत्तत्वंभूतंउभूतंतदेवआशुशीघ्रंव्यक्तात्मकंविषयदादिरूपंस
तमनइत्युच्यते आशुइतिसांख्याभिमतःसृष्टिक्रमोनिरस्तःयुगपत्सृष्टिरेवहिशास्त्रतत्वमितिदृष्टिसृष्टिवादिनांघंटाघोषः २ अभिभूयेतिसार्द्धश्लो
कःमनःकर्तृअर्चिष्मान्प्रकाशकंचिदात्मानंअभिभूयआवृत्यमानसान्व्यसृजत्अर्चिष्मानितिपाठेतुईश्वरःमानसान्सर्वसर्गांतेऽभि
भूयउत्तरसर्गादौव्यसृजदितिशेषं मनःप्रथमंसिसृक्षयाबहुस्यांप्रजायेयेतिश्रुतिसिद्धयाप्रार्थनारूपयाऽनेनमनसोरूपांतरेणोतिद्वितीयपत्त
मुक्तं॥ विविधाकारंकुरुते ३॰

मो॰ आकाशादयः पंचेति सम्प्रमानसाः ७ गुणा इति आकाशादयः पंच क्रमेणैकद्वित्रिचतुःपंचगुणायुक्ता इत्यर्थः तेषां भूतानां मध्ये यस्य तत्पाक
१८१ ल्कालपर्यंतं यथायेन प्रकारेण वर्तते तत्तद्भूतं एकस्तच्छब्दस्तावच्छब्दार्थः। तावत्कालपर्यंतं तावद्गुणं स्मृतं। अत्र पूर्वार्द्धोक्ताव्यवस्था स्थूलसूक्ष्मभू
तेष्ववज्ञेया स्थूलेषु तु पंचीकरणाद् दृष्टं सर्वाण्यपि पंचगुणानि त्रिवृत्करणपक्षे च आकाशवायू क्रमेणैकद्विगुणकौ। इतराणि पंचगुणान्येव ता

181

आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः ४ आकाशात्तु विकुर्वाणात्सर्वगंधवहः शुचिः बलवाञ्जा
यते वायुस्तस्य स्पर्शो गुणो मतः ५ वायोरपि विकुर्वाणाज्ज्योतिर्भवति भास्वरं रोचिष्णु जायते शुक्रं तद्रूपगुणमु
च्यते ६ ज्योतिषोपि विकुर्वाणादापो रसात्मिकाः अद्भ्यो गंधगुणा भूमिः पूर्वेषां सृष्टिरुच्यते ७ गुणाः
पूर्वस्य पूर्वस्य प्राप्नुवंत्युत्तरोत्तरं तेषां यावद्यथा यच्च तत्तावद्गुणं स्मृतं ८ ॥ ॥ ॥ ॥

शयः तत्र पंचीकरणं तु आकाशादीन्प्रत्येकं द्वेधा विभज्य एकस्मिन्भागे स्वेतरभूतचतुष्टयस्यार्द्धीकृतस्य चतुरश्चतुर्थांशान्प्रक्षिप्य एकैकं स्थूल
सूक्ष्मं भूतं भवतीति तथा त्रिवृत्करणं तेजोवन्नानि प्रत्येकं द्वेधा विभज्य एकस्मिन्नर्द्धे स्वेतरयोरर्द्धार्द्धे प्रक्षिपेदिति। एवं संकीर्णेष्वपि आकाशादिसंज्ञाः राम॰
स्वभागाधिक्यादिति ज्ञेयं ८ ॥ ॥ १८१

ननु पंचीकरणपक्षे कथमाकाशे गंधाद्यनुपलंभः कथं वा त्रिवृत्करणपक्षे वायौ गंधोपलंभ इत्याशंक्याह स्थूलाकाशस्याप्रत्यक्षत्वेन तद्गतगं
धादीनामप्यप्रत्यक्षत्वमित्यभिसंधायाह द्वितीयं प्रत्याहृदुपलभ्येति अस्मिन्निदृष्टांतार्थापत्त्याऽस्तु स्थूलानलवेगादिगंधमुपलभ्यते एवं वायावपि आ
गंतुकद्रव्यसंपर्कज एव गंधानुभवो मंतव्यो जानासिद्धद्रव्यसंपर्कज इत्यर्थः अनैपुणा[illegible]दिति मूर्खाणामेवायं पूर्वपक्षो न विदुषां कणादादी
नां ते हि युक्तिबलेनैव वायौ गंधाभावं निश्चिन्वंतीति दर्शितं ९ सप्तमनः सिसृक्षाशब्दितौ महदहंकारौ सूक्ष्माकाशादयश्च असमागम्यत्वाम[illegible]लि

उपलभ्याप्सु चेद्गंधं केचिद्ब्रूयुरनैपुणात् पृथिव्यामेव तं विद्यादपो वायोश्च संश्रयं ९ एते सप्तविधा
त्मानो नानावीर्याः पृथक्पृथक् नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः १० ते समेत्य महात्मा
नो ह्यन्योन्यमभिसंश्रिताः शरीराश्रयणं प्राप्तास्ततः पुरुष उच्यते ११ शरीरं श्रयणाद्भवति मूर्तिमत्सो
डशात्मकं तमाविशंति भूतानि महांति सह कर्मणा १२ ॥ ॥ ॥ ॥ ॥

त्मा १० महात्मानो व्यापकाः समेत्य त्रिदंडविष्टंभवदन्योन्यबलमाश्रित्यैकीभूयेत्यर्थः पुरि इति शरीरस्य नाम तत्र वसतीति पुरुष इत्यन्वयवचार्थः ११ ४
षोडश पंच स्थूलभूतानि समनस्कान्येकादशेंद्रियाणि चैतदात्मकं शरीरं षोडशानां सृष्टिस्कंधव्यक्तात्मकं मन इति मनः सृष्टेर्वोक्तमिति नैतेषां पृथ
क्सिद्धिस्तार्किकाभिमतामंतव्यां षोडशात्मकं पुरुषं तद्दिति पाठे स्थूलशरीरोपक्षपात्कीवलं भ तानि सूक्ष्माणि महांति महत्त्वानि भुक्ता
वशिष्टकर्मसहितानीति। बहुत्वं प्रतिपुरुषं महदादीनां भिन्नत्वप्रतिपादनार्थं तेन तत्तत्पुरुषापास्य सूक्ष्मा बुद्धिरेव कर्माश्रयस्तदुपलक्षितोऽहंका

शां०मो०